मुक्तः। शा॰ विन्वनो विरहं पार्थानसेहिरे

नंयथा॰ स्थितंः ... धृतराष्ट्राद्वैश्यपायांजातः गौतमः कृपः यमौ नकुलसहदेवौ। अन्याश्च स्त्रियः मत्स्यसुता उत्तरा तस्याः पुनर्दृष्टत्वात् पतत्
कत्वच्छ्रीविरहं ... धिक्यात्। यद्वा मत्स्यसुता ... तेषां ... नेके सुतपन्थाये नाह। सत्संगादिति द्वाभ्यां स्मृतास्तु ... सूत।
कः। पुत्रादिविषयाद्दुःसंयोगाये नसः। सद्भिः कीर्त्यमानं ... यशः सकृदप्याकर्ण्य सुसंगत्यक्तुं न शक्नोति॥१॥ दर्शनादिति।
तस्मिन्श्रीकृष्णे न्यस्ताश्च ... स्पर्शाधीर्येषां ते॥ अत एव च अनिमिषैर्नेत्रैस्तमेव वीक्षमाणाश्च तत्र तत्राहणानयनाद्यर्थं चलति स्म। यतः स्नेहे

आमंत्र्य चाभ्यनुज्ञातः परिष्वज्याभिवाद्य तं॥ आरुरोह रथं कैश्चित्परिष्वक्तोभिवादितः॥८॥ सुभद्रा द्रौपदी कुंती विराटतनया तथा॥
गांधारी धृतराष्ट्रश्च युयुत्सुर्गौतमो यमौ॥९॥ वृकोदरश्च धौम्यश्च स्त्रियो मत्स्यसुतादयः॥ न सेहिरे विमुह्यंतो विरहं शार्ङ्गधन्वनः
१०॥ सत्संगान्मुक्तदुःसंगो हातुं नोत्सहते बुधः॥ कीर्त्यमानं यशो यस्य सकृदाकर्ण्य रोचनं॥११॥ तस्मिन्न्यस्तधियः पार्थाः
सहेरन्विरहं कथं॥ दर्शनस्पर्शनालापशयनासनभोजनैः॥१२॥ सर्वे तेनिमिषैरक्षैस्तमनुद्रुतचेतसः॥ वीक्षंतः स्ने
हसंबद्धा विचेलुस्तत्र तत्र ह॥१३॥ न्यरुंधन्नुद्गलद्बाष्पमौत्कंठ्याद्देवकीसुते॥ निर्यात्यगारान्नोभद्रमिति स्याद्बांधव
स्त्रियः॥१४॥ मृदंगशंखभेर्यश्च वीणापणवगोमुखाः॥ धुंधुर्यानकघंटाद्या नेदुर्दुंदुभयस्तथा॥१५॥ ॥

नसंबद्धाः अत एव तं अनुगतानि चेतांसि येषां ते॥ अगारान्निर्याति निर्गच्छति स्मेति औत्कंठ्याद्धेतोः उद्गलत् स्रवत् बाष्पं च
अश्रु न्यरुंधन् नेत्रेष्वेव स्थापितवत्यः तत्र हेतुः अभद्रं मा भूत्। अमंगलं मा भूदिति तदर्थं मृदंगादयो दश वाद्य नेदुः॥१॥
मृदंगशंखभेर्यश्च वीणापणवगोमुखाः॥ झर्झरानकघंटाद्या नेदुर्दुंदुभयः समं॥१५॥ सममेककालं॥१५

प्रेमव्रीडास्मितं तत्सर्वमीक्षणं यस्मात्तां ।[16] गुडाका निद्रा तस्या ईशो जितनिद्रोऽर्जुनः ।[17] अजनेत्वा मे जगद्गुरुः । मधुपतिः श्रीकृष्णः[18] मत्वा ।
घ श्रीकृष्णेतास्मामेत्यानिवारात् । किंतु नानुरूपा स्थता अनुरूपास्त्रि । निर्गुणस्य परमानंदस्य सुखेत्तिवताद्ये नानुरूपा गुणात्मनो
मानुष्यनाद्यावतारे अनुरूपास्थेत्यर्थः । संधिरार्षः । सर्वासां स्त्रुतीनां मनोहरः रूपानिषद्दोपि न तास्मितः । मत्वा तं संजल्पमस्पनंदत्स्त्री
त्यर्थः । तत्र तेजसोऽदयाद्यतिशयेन विस्मिता [illegible] स्रवी तेषा न्यास्त्रियः कथयंति नात्र विस्मयः कार्यः साक्षादीश्वरत्वादस्यापि ।
मवाङ्इति चतुर्भिः । विस्मरणो किलेति प्रसिद्धौ प्रमाणद्योतकं । यएक एवाद्वितीयः पुरुषश्चासीत्स एवायं श्रीकृष्णः कुत्रापी

प्रसादशिखरारूढाः कुरूनार्या दिदृक्षया ॥ ववर्षुः कुसुमैः कृष्णे प्रेमव्रीडास्मितेक्षणाः ॥ १६ ॥ सितातपत्रं जग्राह मुक्ता का
दामविभूषितं ॥ रत्नदंडं गुडाकेशः प्रियः प्रियतमस्य ह ॥ १७ ॥ उद्धवः सात्यकिश्चैव व्यजने परमाद्भुते ॥ विकीर्यमाणः कुसु
मै रेजे मधुपतिः पथि ॥ १८ ॥ अश्रूयंताशिषः सत्यास्तत्र तत्र द्विजेरिताः । नानुरूपानुरूपाश्च निर्गुणस्य गुणात्मनः ।
१९ ॥ अन्योन्यमासीत्संजल्प उत्तमश्लोकचेतसां । कौरवेंद्रपुरस्त्रीणां सर्वश्रुतिमनोहरः ॥ २० ॥ स्त्रिय ऊचुः ॥
स वै किलायं पुरुषः पुरातनो य एक आसीदविशेष आत्मनि ॥ अग्रे गुणेभ्यो जगदात्मनीश्वरे निमीलितात्म
न्निशि सुप्तशक्तिषु ॥ २१ ॥

४२ तस्य विशेषस्यात्मनि निःप्रपंचे निजरूपे । कदा अग्रे गुणेभ्यः [illegible] सृष्टेः तथा निशि प्रलये । तस्य लक्षणं । जगतामात्म
नि जीवे निमीलितात्मनि निमीलितात्मन्निति लुप्त [illegible] पदं । जीतावेकवचनं ईश्वरे लीनत्वप्रपंचस्य [illegible]
नन्जीवानां [illegible] सचालकथं लयस्तत्राह । सुप्तास्तु शक्तिषु [illegible] गापाधिलक्षणा वा दिशा किलया [illegible] वल

गोपुरं पुरद्वारं गृहद्वारं । कृतानि कौतुकेन उत्सवेन तोरणानि यस्यां । गरुडादिचिह्नांकितध्वजाः ४ जयन्तयंत्रांकांकिताः पता
काश्चित्राणां ध्वजपताकानाम ग्रैः अंतः प्रतिहत आतपो यस्यां । संमार्जितानि निःसारितरजस्कानि महामार्गादीनि यस्यां । महा
मार्गा राजमार्गा रथ्या इतरमार्गा । आपणकाः पण्यवीथयः चत्वराणि अंगणानि । जलादि लिप्तश्च अवकीर्णं प्रेष्ठमायांतां निश
१५

का १ निरउत्क १

गोपुरद्वारमार्गेषु कृतकौतुकतोरणां । चित्रध्वजपताकाग्रैरंतः प्रतिहतातपां ॥ १३ ॥ संमार्जितमहामार्गरथ्यापणकचत्वरां ।
सिक्तां गंधजलैरुप्तां फलपुष्पाक्षतांकुरैः ॥ १४ ॥ द्वारि द्वारि गृहाणां च दध्यक्षतफलेक्षुभिः । अलंकृतां पूर्णकुंभै
र्बलिभिर्धूपदीपकैः ॥ १५ ॥ निशम्य प्रेष्ठमायांतं वसुदेवो महामनाः । अक्रूरश्चोग्रसेनश्च रामश्चाद्भुतविक्रमः
॥ १६ ॥ प्रद्युम्नश्चारुदेष्णश्च सांबो जांबवतीसुतः । प्रहर्षवेगोच्छ्वसितशयनासनभोजनाः ॥ १७ ॥ वारणेंद्रं पुरस्कृ
त्य ब्राह्मणैः ससुमंगलैः । शंखतूर्यनिनादेन ब्रह्मघोषेण चादृताः ॥ १८ ॥ प्रत्युज्जग्मू रथैर्हृष्टाः प्रणयागतसा
ध्वसाः ४ । वारमुख्याश्च शतशो यानैस्तद्दर्शनोत्सुकाः ॥ १९ ॥ लसत्कुंडलनिर्भातकपोलवदनश्रियः ॥ २० ॥

प्रेष्ठं श्रीकृष्णं वसुदेवादयः प्रत्युज्जग्मुरिति चतुर्थेनान्वयः ४ प्रहर्षवेगेन उच्छ्वसितानि उल्लंघितानि शयनादीनि यैः । ससुमंगलैः तपतौ वा
रणेंद्रं मंगलार्थं पुरतः कृत्वा ससुमंगलैः सुमंगलपुष्पादियुक्तपाणिभिः । ब्रह्मघोषो मंत्रपाठः । प्रणयेन स्नेहेन आगतं सा
ध्वसं संभ्रमो येषां वारमुख्याश्च शतशः हृदयस्थ प्रत्युज्जग्मुः १९ लसत्कुंडलैः भांतानि यानि कपोलानि तैर्वदनश्रीर्यासां ताः वा
रमुख्याः नर्तक्या वेश्याः ४ ॥ २०

रा॰भू॰

नट॰१

अद्भुतानि चेति चकारस्य वंदिनस्थेत्यन्वयः॥ नवरसानि नयवतुराःतालाद्यनुसारेण नृत्यंते ते नर्तकाः गंधर्वा गायकाः स्तुतौ पौरा गि
काश्च ते स्तुताः मागधा वंशशंसकाः वंदिनस्तु अमलप्रज्ञाः प्रस्तावसदृशोक्तयः ते सर्वे गायंति चेति चकारस्यान्वयः यथाविधि यैः
सहयथाचितं तेस्तथा समागमनं कृत्वा सर्वेषां मानं कृतवानित्यर्थः॥ तदाह॥ अकृतिमं कृत्वा शिरसा नतिः॥ आलिवादनं वाचा
नतिः॥ आस्वादस्य सुखलयं दृत्वा पाकादिनं प्रतिव्याप्य वैः अभीष्टवादैश्च मानं कृतवान्॥ अन्यैर्वंदिभिश्च॥ तस्य भक्तेण महानुत्सवोयास्य

२४

नटनर्तकगंधर्वाः स्तुतमागधवंदिनः॥ गायंति चोत्तमश्लोकचरितान्यद्भुतानि च॥२१॥ भगवांस्तत्र बंधूनां पौराणामनु
वर्तिनां॥ यथाविध्युपसंगम्य सर्वेषां मानमादधे॥२२॥ प्रह्वाभिवादनाश्लेषकरस्पर्शस्मितेक्षणैः॥ आश्वास्य
चाश्वपाकेभ्यो वरैश्चाभिमतैर्विभुः॥२३॥ स्वयं च गुरुभिर्विप्रैः सदारैः स्थविरैरपि॥ आशीर्भिर्युज्यमानोन्यैर्वंदिभि
श्चाविशत्पुरं॥२४॥ राजमार्गं गते कृष्णे द्वारकायाः कुलस्त्रियः॥ हर्म्याण्यारुरुहुर्विप्र तदीक्षणमहोत्सवाः॥२५॥ नि
त्यं निरीक्ष्यमाणानां यदपि द्वारकौकसां॥ न वितृप्यंति हि दृशः श्रियो धामांगमच्युतं॥२६॥ श्रियो निवासो यस्यो
रः पानपात्रं मुखं दृशां॥ बाहवो लोकपाला नां सारंगाणां पदांबुजं॥२७॥

४७

घ

यद्यप्यस्मात् नित्यं सदा अच्युतं निरीक्ष्यमाणानामपि दृशो नैव तृप्यंति॥ अतस्तास्तं द्रष्टुं हर्म्याण्यारुरुहुरित्यर्थः॥ अतृप्तिं श्रियः शोभायाः धामस्थानमंगं य

लक्ष्म्याः

स्य तं॥ तदेवाभिनयेनाह॥ श्रियालक्ष्म्याः पायस्योरः वक्षो निवासः॥ यस्य मुखं सर्वेषां प्राणिनां दृशां सौंदर्यामृतपानाय पात्रं॥ य
स्य बाहवो लोकपाला नां निवासस्थानं सारंगा गायंतीति सारंगास्तेषां यस्य पदांबुजं निवासस्थानं निरीक्ष्यमाणानां दृशां इति
सर्वेनान्वयः॥ ॥२७

र्कोघनोयथा १

व. उत्ते २

सितैरातपत्रव्यजनैरुपस्कृतोलंकृतः॥ अर्क ॥ अर्कउडुपेन छत्रं महितं अर्कःइंद्रचापमिंद्रधनुः वैद्युतं विद्युत्तेजः तैः॥ अर्कः छत्रस्योपमानं।
सितैरातपत्रव्यजनैरुपस्कृतोलंकृतः॥ अर्कस्थानेउडुपेन छत्रं सहितं अर्कः इंद्रचापमिंद्रधनुः वैद्युतं विद्युत्तेजः तैः॥ अर्कः छत्रस्योपमानं।
सितैरातपत्रव्यजनैरुपस्कृतोमंडितः॥ अर्कः सूर्यउडुपेन छत्रं संहितं इंद्रचापमिंद्रधनुः वैद्युतं विद्युत्तेजः तैः॥ अर्कः छत्रस्योपमानं।
सितैरातपत्रव्यजनैरुपस्कृतोमंडितः॥ अर्कः सूर्यः उडुपश्चंद्रः इंद्रचापं वनमालायाः विद्युत्तेजः पिशंगवाससी॥ अन्वेतोपमेयो यदि घनस्य
नक्षत्राणि पुष्पवृष्टेः॥ चंद्रः परितःसंस्कृतमंडलाकारयोश्चामरयोः चापं वनमालायाः विद्युत्तेजोभ्यादित्यवत्।तर्हि सघनोयथाभातितथाहरिर्बभावि
परिस्फूर्यविंबं अनयतश्चंद्रोमंडलवन्नक्षत्राणिमध्येमिलितचापद्वयमस्थिरं विद्युत्तेजोव्यादि एवं विशेषणज्ञानपनार्थयुक्तं॥ अष्टादशापिवसुदेवस्यस्त्रीयामातृतुल्यत्वान्मातृ
त्वर्थः॥ देवकीप्रमुखाः सप्तववंदइतिमातृमौदर्यादरविशेषज्ञानाप॥ प्रोष्यदेशांतरेउषित्वा आरातूदूरादेवविलोक्यसंजातामनसिमहो
तावस्सहस्राणिचषोडशेतिचकारश्छोत्तरशताधिकानीतिज्ञेयं॥

२८ ३

सितातपत्रव्यजनैरुपस्कृतः प्रसूनवर्षैरभिवर्षितःपथि॥ पिशंगवासावनमालयाबभौघनोयथार्कोडुपचापवैद्युतैः॥२७॥
प्रविष्टस्तुगृहंपित्रोःपरिष्वक्तःस्वमातृभिः॥ ववंदेशिरसासप्तदेवकीप्रमुखामुदा॥२८॥ ताःपुत्रमंकमारोप्यस्नेहस्नु
तपयोधराः॥ हर्षविह्वलितात्मानःसिषिचुर्नेत्रजैर्जलैः॥२९॥ अथाविशत्स्वभवनंसर्वकाममनुत्तमं॥ प्रासादायत्र
पत्नीनांसहस्राणिचषोडश॥३०॥ पत्न्यःपतिंप्रोष्यगृहानुपागतंविलोक्यसंजातमनोमहोत्सवाः॥ उत्तस्थुराराप्सहसा
सनाशयात्साकंव्रतैर्व्रीडितलोचनाननाः॥३१॥२७॥

त्सवाः यस्मंताः॥ आसनादाशयाच्च आसनादेहनउत्तस्थुः॥ आशयोंतःकरणंतस्मादप्यात्मनोत्तस्थुः॥ श्रीकृष्णेनात्मनःसंश्ले
षेच्छांतःकरणव्यवधानमपिनासहंतेत्यर्थः॥ व्रीडितानिलोचनानिआननानिचयस्मंताः॥ अपांगैरवलोकनात्व्रीडितलोच
नाः अवनतमुखत्वात्व्रीडिताननाः॥ साकंव्रतैरितिहास्यक्रीडावर्जनादिनियमाश्चपितास्यउत्तस्थुरित्यर्थः॥ इतश्चतास्ताएवउत्तस्थु
रितिव्रतानिचयाज्ञवल्क्येनोक्तानि॥ क्रीडांशरीरसंस्कारंसमाजोत्सवदर्शनंहास्यंपरगृहेयानंत्यजेत्प्रोषितभर्तृकेति॥छ॥छ॥ २१५

अयंतंपतिंदर्शनात्सूर्वमात्मनावुआपरिरेनिर्वृतेतोहष्टिस्ति· ततःसमीपमागा तमात्मजैः पुत्रैगृहीतकंठमालिंगयस्पदवस्थयम्।
लिंगितइत्यर्थः॥ अत्रैरतुङ्डुरंतमावाः। गंभीरारातिप्रायाः। तदाचतासांनेत्रयोः निस्फङ्गमप्यश्रुवाष्पंवैक्लव्यात्॥ वैवश्यपातस्त्र
४८ अवतद्रूपस्तु अाघो अतएवधैर्यहान्या॥ विलज्जतीनांहत्तगुवर्ष्यचित्रंश्लाण्वति॥ पार्श्वगतः। समीपस्थः। तत्रापिरहोगतःभूप
कांतेप्रवर्ततेस्म॥ पदपदेप्रतिक्षणंनवंनवमेव॥ अत्रकेस्तुत्यन्यायः॥ काविरमेतेति। चलाचंचलस्वसावापि॥उर्क्के
२२

तमात्मजैर्दृष्टिभिरंतरात्मनाडुरंतभावाःपरिरेभिरेपतिं॥ निरुद्धमप्यास्रवदंबुनेत्रयोर्विलज्जतीनांभृगुवर्यवैक्ल
व्यात्॥ ३२॥ यद्यप्यसौपार्श्वगतोरहोगतस्तथापितस्यांघ्रियुगंनवंनवं॥ पदेपदेकाविरमेततत्पदाच्चलापियच्
छ्रीर्नजहातिकर्हिचित्॥ ३३॥ एवंनृपाणांक्षितिभारजन्मनामक्षौहिणीभिःपरिवृत्ततेजसां॥ विधाययवैरंश्व
सनोयथानलंमिथोवधेनोपरतोनिरायुधः॥ ३४॥ सएषनरलोकेस्मिन्नवतीर्णःस्वमायया॥ रेमेस्त्रीरत्न
कूटस्थोभगवान्प्राकृतोयथा॥ ३५॥ ॥ ॥ ॥ ५८

श्रीकृष्णचरितंसंक्षिप्याह॥ एवमितिद्वाभ्यां॥ क्षितेर्भारायजन्मयेषांअक्षौहिणीभिःकृत्वापरिवृतंसर्वतःप्रसृतंतेजःअन्य
वीयेषां॥ श्वसनोवायुर्वेणूनांअन्योन्यसंघर्षजंनलंविधायमिथोदाहेनयथोपशाम्यतितद्वत्॥ ३४॥ स्त्रीरत्नकूटस्थःउ
त्तमस्त्रीकदंबस्थः॥ ॥ ॥ ३५

८

मद्यतिमदीहृर्षग्लान[illegible]

नन्वेवंस्त्रीसंगादिभिःसंसारप्रतीतेःकथंभगवाननवतीर्णइत्युच्यतेतत्राह।उद्दामेतिद्वाभ्यां।यासांउद्दामःगंभीरोयोभावोअभिप्रायः।तस्य
पिशुनःसूचकोयःअमलोवल्गुसुंदरोहासोव्रीडावलोकश्चताभ्यांनिहतःअमदनःश्रीमहादेवोपिसंमुह्यलज्जयाचापंपिनाकंअज
हात॥अथवानिहतस्ताडितोमदनोपिजगद्विजयीसंमुह्यविकर्तव्यतामूढःसन्चापंधनुःलज्जयाअजहात।जहातास्वप्रमदोत्त
माःकामविजयिन्योपि।एवंभूतावामाःस्त्रियइत्येतावद्विवक्षितं।यद्भगवतामोहिनीरूपेणमहेशोपिमोहितएव।एताश्चतादृग्विला
साःएवेतियथाउक्तं।ताःकुहकैःकपटैःविभ्रमैःयस्यइंद्रियंमनःविमथितुंक्षोभयितुंनशेकुः।नशक्ताः।नतिश्रीकृष्णं[illegible]आकुला
लोकः।आत्मौपम्येनस्वस्मादृष्टांतेनसंगिनंमनुजंमन्यते।अत्रहेतुःव्यापृण्वानंव्याप्रियमाणं।यतोयमबुधः।अतस्तज्ज्ञःकुतइत्यपेक्षा
यामैश्वर्यलक्षणमाह।एतदिति।ईशस्यईशनमैश्वर्यंनामएतदेव।किंतत्।प्रकृतिस्थोपितस्यागुणैःसुखदुःखादिभिःसदानयुज्यतइति

१

उद्दामभावपिशुनामलवल्गुहासव्रीडावलोकनिहतोमदनोपियासां॥संमुह्यचापमजहात्प्रमदोत्तमास्तायस्येंद्रियंविमथितुंकु
हकैर्नशेकुः॥३६॥तमयंमन्यतेलोकोह्यसंगमपिसंगिनं॥आत्मौपम्येनमनुजंव्यापृण्वानंयतोऽबुधः॥३७॥एतदीशनमीशस्य
प्रकृतिस्थोपितद्गुणैः॥नयुज्यतेसदात्मस्थैर्यथाबुद्धिस्तदाश्रया॥३८॥तंमेनिरेऽबलामूढाःस्त्रैणंचानुव्रतंरहः।अप्रमाण
विदोभर्तुरीश्वरंमतयोयथा॥३९॥इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेएकादशोऽध्यायः॥ ॥श्रीकृ[illegible]वर्णनं

सत्यादीतस्थानंद

यतः।यथाआत्मस्थैर्ज्ञानानंदादिभिःआत्माश्रयापिबुद्धिर्नयुज्यतेतद्वत्।वैधर्म्यदृष्टांतोवा।आत्मस्थैःसत्त्वाज्ञकार्याादिभिःयथाबुद्धिर्न ११॥
।यार्स्वियोनः र्युज्यतइति।एवंवासदात्मादेहःअत्रस्थैर्गुणैःतदाश्रयाबुद्धिःतदुपाधिर्जीवोयुज्यते॥एवंप्रकृतिस्थोपितद्गुणैर्नयुज्यतइति।यतः।
एतदीशनमीशस्येति।तत्पत्न्योपितस्यतत्त्वंनजानंतीत्याह।तंमेनेइति।स्त्रैणंआत्मवशंपरंरहःएकांतेअनुव्रतं।अनुसृतंतंचमेनिरे।तस्यप्रमा
णविदःप्रमाणमियत्तामहिमानमजानंत्यइत्यर्थः॥ईश्वरंतद्गुणंमतयःअहंकृतयोयथास्वाधीनंस्वधर्मयोगिनंमन्यंतेतद्व
त्।यद्वायथातासांमतयःकल्पनाःतथातमीश्वरंस्त्रैणादिरूपंमेनिरेइत्यर्थः॥इतिश्रीभागवतेप्रथमस्कंधेएकादशः॥

भा॰म॰

४९

पुराक्तं यत्र संगायद्रौणिदंडाद्विनिर्मुक्त। ह्यादयोत्तु तदेवायुपरीक्षितं जन्मवर्णयति॥१॥ परीक्षितो राजर्षेर्जन्मकर्म्मविलापनं॥ संस्थां
च पांडुपुत्राणां वक्ष्ये कृष्णकथोदयमिति प्रतिज्ञायां पांडवानां राज्यस्थितिरूपोद्धात तत् तामसअर्थं गमनसमाधाय भारस्यानिरूपितांडुद
नीमुपोद्धातिकमुक्तानुवादपूर्वकं पृच्छति॥ अश्वत्थाम्नेति॥ उपसृष्टेन विसृष्टेन तस्य जन्मेत्यादिब्रूहीत्युत्तरेणान्वयः॥ तत्र परीक्षि
तमत्तदे हन्तस्वका॥ प्रार्थयेन ब्रह्मज्ञानं प्राप्यामीत्याह॥ गादितुं यदि मन्यसे अनुग्रहेण तद्ब्रूहीति॥ यस्मै ज्ञानमदाच्छुक इति॥ अथ वर्णेच्छा

शौनक उवाच॥ अश्वत्थाम्नोपसृष्टेन ब्रह्मशीर्ष्णोरुतेजसा॥ उत्तराया हतो गर्भ ईशेनाजीवितः पुनः॥१॥ तस्य जन्म महा
बुद्धेः कर्म्माणि च महात्मनः॥ निधनं च यथैवासीत्स प्रेत्य गतवान्यथा॥२॥ तदिदं श्रोतुमिच्छामि गदितुं यदि मन्यसे॥ ब्रू
हि नः श्रद्दधानानां यस्य ज्ञानमदाच्छुकः॥३॥ श्रीसूत उवाच॥ अपीपलद्धर्मराजः पितृवद्रंजयन्प्रजाः॥ निस्पृहः स
र्वकामेभ्यः कृष्णपादानुसेवया॥४॥ संपदः क्रतवो लोका महिषी भ्रातरो मही॥ जंबूद्वीपाधिपत्यं च यशश्च त्रिदिवं गताः॥५
किं ते कामाः सुरस्पार्हा मुकुंदमनसो द्विजाः॥ अधिजह्रुर्मुदं राज्ञः क्षुधितस्य यथेतरे॥६॥॥ कृष्णायनमः॥ ॥

४९

यां कारणं निस्पृहस्य पाण्डिराज्ञः श्रीकृष्णानुग्रहात्ता दृक्पौत्रस्य जनीति वक्तुं॥ तस्य श्रीकृष्णे तत्परतामुद्दिश्य आह॥ अपीप
लदिति त्रिभिः॥ पितृवदपीपलत्पालयामास॥ क्रतवः तदुपार्जिता लोकाश्च सुरस्पार्हाः सुराणामपि स्पृहणीयाः अस्य
पदादयः॥ कामाः विषया राज्ञः किं मुदं प्रीतिमधिजह्रुः॥ न कृतवंतः इत्यर्थः॥ अत्र हेतुः मुकुंदे एव मनो यस्येति॥ क्षु
धितस्य अन्नं विनान्ये यथा इतरे स्रक्चंदनादयो न कुर्वंति तद्वत्॥ कृष्णायनमः॥ श्रीरामचन्द्रायनमः॥॥

प्रकृतमाह॥मातुरिति॥पुरटं सुवर्णं स्फुरत्पुरटमौलिर्यस्य अस्तितंडीसादिच्छेत्र तेषु त्वयः॥अपीच्यं अतिसुंदरं॥क्षणतइति दर्शनं
दर्शनं यस्य॥तडिद्वास सीयस्य अतिशयामंमिति च पदद्वयं॥विद्युत्भूषितमेघार्थमाह्वचितो॥अच्युतं अविकारं॥तप्तं दहातीर्णयकां
चनं तन्मये कुंडले यस्य। क्षतजाक्षं रक्तवर्णं तद्वारकनेत्रं अस्त्रहोमद्भकम्यापिगर्भ्रोत्साहादिपिद्दितिलाव॥अस्त्रतेजो विधमंतं वि
नाशयंतं॥नीहारादिमं गोपतिः सूर्यइव॥एवंविधं गर्भगतो बालः संनिकर्षे समीपे ददर्श दृष्ट्वा च असौ कइति पर्यैक्षत

मातुर्गर्भगतो वीरः स तदा भृगुनंदन॥ददर्श पुरुषं कंचिद्दह्यमानोस्त्रतेजसा॥७॥अंगुष्ठमात्रममलं स्फुरत्
पुरटमौलिनं॥अपीच्यदर्शनं श्यामं तडिद्वाससमच्युतं॥८॥श्रीमद्दीर्घचतुर्बाहुं तप्तकांचनकुंडलं। क्षत
जाक्षं गदापाणिमात्मनः सर्वतो दिशं॥९॥परिभ्रमंतमुल्काभां भ्रामयंतं गदां मुहुः। अस्त्रतेजः स्वगदया नी
हारमिव गोपतिः॥१०॥विधमंतं संनिकर्षे पर्यैक्षत कइत्यसौ॥विधूय तदमेयात्मा भगवान्धर्मगुब्विभुः॥११॥
मिषतो दशमासस्य तत्रैवांतर्दधे हरिः। ततः सर्वगुणोदर्के सानुकूलग्रहोदये॥१२॥जज्ञे वंशधरः पांडोर्भूयः
पांडुरिवौजसा॥१३॥

वितर्कितवान्॥अमेयात्मा कथं तद्विधूतवानित्य वितर्क्यत्वं रूपः॥धर्मं गोपायतीति धर्मगुप्॥दशमासस्य परिच्छेद्यस्य तस्य पश्यि
पश्यतः पश्यतः॥यत्र दृष्टस्तत्रैवांतर्हितः॥न त्वन्यत्र गतः यतो विभुः सर्वगतः॥उदर्के उत्तरफले॥सर्वगुणानां सूत्तरोत्तराधिक्य
सर्वकेलग्ने॥तत्र हेतुः अनुकूलैर्ग्रहैः माहितानां सुलग्रहाणां उदयो यस्मिन्॥कृष्णायनमः॥॥रामायनमः॥ ॥ ॥

रमै १ १२

ना॰प्र

जातकंजातकर्ममंगलंपुण्याहं॥वरान्श्रेष्ठान्॥स्वन्नंशोभनमन्नंच॥यावन्नछिद्यतेनालंतावन्नाप्नोतिसूतकं॥छिन्नेनाले
ततःपश्चात्सूतकंतुविधीयते॥इतिवचनात्तत्पूर्वंप्रदाय॥आमान्नंवा॥प्रजातीर्थेपुत्रोत्पत्तिपुण्यकाले॥पुत्रेजातेव्यती
पातेदत्तंभवतिचाक्षय्यमितिस्मृतेः॥देवाश्चपितरश्चैवपुत्रेजातेद्विजन्मनां॥आयांतिहिनृपश्रेष्ठपुण्याहमितिचाब्रुव
५० न्॥हेपौरवर्षभत्वत्पुरूणांपुरुवंश्यानांशुक्लेशुद्धेयस्मिन्प्रजातंतौदैवेनकथंभूतेनअप्रतिघातेनदुर्वारेण॥संस्थां

तस्यप्रीतिमनाराजाविप्रैर्धौम्यकृपादिभिः॥जातकंकारयामासवाचयित्वाचमंगलं॥१४॥हिरण्यंगांमहींग्रा
मान्हस्त्यश्वान्नृपतिर्वरान्॥प्रादात्स्वन्नंचविप्रेभ्यःप्रजातीर्थेसतीर्थवित्॥१५॥तमूचुर्ब्राह्मणास्तुष्टा
राजानंप्रश्रयान्वितं॥एषह्यस्मिन्प्रजातंतौपुरूणांपौरवर्षभ॥१६॥दैवेनाप्रतिघातेनशुक्लेसंस्थामु
पेयुषि॥रातोवोऽनुग्रहार्थायविष्णुनाप्रभविष्णुना॥१७॥तस्मान्नाम्नाविष्णुरातइतिलोकेबृहच्छ्रवाः॥ ५०
भविष्यतिनसंदेहोमहाभागवतोमहान्॥१८॥युधिष्ठिरउवाच॥अप्येषवंश्यान्राजर्षीन्पुण्यश्लोका
न्महात्मनः॥अनुवर्तितास्विद्यशसासाधुवादेनसत्तमाः॥१९॥ ॥ ॥

नाशंउपेयुषिगतेसतिवोऽनुग्रहार्थाययस्मात्प्रभवनशीलेनश्रीविष्णुनारातोदत्तःतस्माल्लोकेविष्णुरातःइतिनाम्ना
भविष्यति॥महाभागवतश्चगुणैश्चमहान्भविष्यतिनात्रसंदेहःतंराजानंब्राह्मणाऊचुरितित्रयाणामन्वयः॥महा
भागवतोभविष्यतीत्युक्तेहृष्टःपृच्छति॥अपिस्वित्साधुवादेनयशसाकीर्त्याअनुवर्तिताभविष्यतीतिसर्व
स्यवातःपरमप्यनुषंगः॥ १८

प्रजानामविता रक्षकः॥ मानवः मनोः पुत्रः। ब्राह्मणेषु हितः सत्यप्रतिज्ञश्च श्रीरामो दाशरथिर्यथा॥ १८
मुशपेनायद्वाशरणागतकपोतारक्षितः॥ स्वानां ज्ञातीनायद्दातीचयशोविस्तारः कीदीक्षंतितिरतइव॥ १७॥ अर्जुनया पार्थका महत्वाज्जुनः
त्वीर्ययो॥ १९॥ हिमवानिवमततांनिषव्यः॥ अनन्यगतिकद्वेनवसुधवतितितिक्षुः। दात्याग्रीत्यामातापितराविव सौहिक्षुः॥ २०॥ पिताम

ब्राह्मणऊचुः॥ पार्थप्रजानां विताभ्राद्यादिरिक्ष्वाकुरिवमानवः॥ ब्रह्मण्यः सत्यसंधश्च रामोदाशरथिर्यथा॥ १८॥ एषदाताशर
ण्यश्च यथा स्यौशीनरः शिबिः॥ यशोवितनिता स्वानां दौक्षंतिरिवयज्ञानां॥ १९॥ धन्विनामग्रणीरेषतुल्यश्चार्जुन
योर्द्वयोः॥ क्रुतासइवदुर्धर्षः समुद्रइवदुस्तरः॥ २०॥ मृगेंद्रइवविक्रांतोनिषेव्योहिमवानिव॥ तितिक्षुर्वसुधेवासौ
सहिष्णुः पितराविव॥ २१॥ पितामहसमः साम्येप्रसादेगिरिशोपमः॥ आश्रयः सर्वभूतानांयथादेवोरमाश्रयः॥ २२॥ स
र्वसद्गुणमाहात्म्यएषकृष्णमनुव्रतः॥ रंतिदेवइवोदारोययातिरिवधार्मिकः॥ २३॥ धृत्याबलिसमः कृष्णेप्रह्लादइवस
द्ग्रहः। आहर्तैषोऽश्वमेधानांवृद्धानांपर्युपासकः॥ २४॥ राजर्षीणांजनयिताशास्ताचोत्पथगामिनां॥ निग्रहीताकलेरेष
भुवोधर्मस्यकारणात्॥ २५॥ तक्षकादात्मनोमृत्युंद्विजपुत्रोपसर्जितात्॥ प्रपत्स्यतेउपश्रुत्यमुक्तसंगःपदंहरेः॥ २६॥ जि
ज्ञासितात्मयाथार्थ्योमुनेर्व्याससुतादसौ॥ हित्वेदंन्टपगंगायांयास्यत्यद्धाकुतोभयं॥ २७॥

दौब्राह्मतेनसमः साम्येसमदेवोरमाश्रयोहरिः॥ सर्वैः सद्गुणैर्यन्माहात्म्यंतस्मिन्श्रीकृष्णतुल्यः॥ धृत्याधैर्येणासन्तुलय
कृष्णस्तिनिवसायस्यआहर्तानिकर्ता॥ द्विजपुत्रेणप्रेरितात्तक्षकात्स्वात्मनोमृत्युमुपश्रुत्यहरेःपदंप्रपत्स्यतेलविष्यति॥ रथ
ततश्चजिज्ञासितमात्मनोयाथार्थ्यंयेन सः॥ इदंशरीरंगंगायांहित्वाकुतोभयंपदंयास्यति॥ ॥२७॥२५॥
२७॥ राजर्षीणांजनमउत्पादीनां २

भा०प्र

लब्ध्वाउपचितिः प्रजायैः परीक्षिदितिनामनिर्वक्ति। सएषइति। यद्यस्मात्प्रभुः समर्थः सन् गर्भेदृष्टंपुरुषंअनुध्यायन् इहदृश्यमानेषु
नरेषुमध्येसर्वमपिनरंपरीक्षेत अयमसौतद्वदितिनावादीतिविचारयेत् ततःपरीक्षिदितिख्यातः सर्वदृष्टमितिवापाठः। शुक्लेशुक्लप
क्षेनरेषुप्रसिद्धउडुपः। अन्वहंयथाकाष्ठाभिःपंचदशकलाभिः आपूर्यमाणोवर्द्धते। एवंपितृभिःयुधिष्ठिरादिभिःकामैःअनुषष्ठि
कलाभिःआपूर्यमाणोवर्द्धते॥ सर्वमपकृष्यो क्षात्अश्वमेधैःसत्वा वस्परेसप्रकाशंकथयति। ज्ञातिद्रोहस्यहानेच्छया यक्ष्यमाणः

इतिराज्ञउपादिश्यविप्राजातककोविदाः॥ लब्धापचितयःसर्वेप्रतिजग्मुःस्वकान्गृहान्॥२८॥ सएषलोकेविख्यातः
५१ परीक्षिदितियत्प्रभुः॥ सर्वंदृष्टमनुध्यायन्परीक्षेतनरेष्विह॥२९॥ सराजपुत्रोववृधेआशुशुक्लइवोडुपः॥ आपूर्यमा
णःपितृभिःकाष्ठाभिरिवसोऽन्वहं॥ यक्ष्यमाणोऽश्वमेधेनज्ञातिद्रोहजिहासया॥ राजालब्धधनोदध्यौनान्यत्रकरदंड
योः॥३१॥ तदभिप्रेतमालक्ष्यभ्रातरोऽच्युतचोदिताः॥ धनंप्रहीणमाजह्रुरुदीच्यांदिशिभूरिशः॥३२॥ तेनसंभृतसं ५१
भारोलब्धकामोयुधिष्ठिरः॥ वाजिमेधैस्त्रिभिर्भीतोयज्ञैःसमयजद्धरिं॥३३॥ आहूतोभगवान्राज्ञायाजयित्वाद्विजैर्नृ
पं॥ उवासकतिचिन्मासान्सुहृदांप्रीतिकाम्यया॥३४॥ ततोराज्ञाऽभ्यनुज्ञातःकृष्णयासहबंधुभिः॥ ययौद्वारवतीं
ब्रह्मन्सार्जुनोयदुभिर्वृतः॥३५॥ इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेद्वादशोऽध्यायः॥ १२ अध्याय नमः॥

पारीक्षिते

करदंडयोरन्यत्रताभ्यांविनानलब्धधनः दध्यौचिंतयामास। करदंडस्यपरिजनलरणमात्रापक्षीणत्वात्। प्रहीणंमरुत्तस्यय
ज्ञस्यसंबंधिसुवर्णपात्रादिकमानीतवंतः॥ संभृतसंभारःसंपादितयज्ञोपकरणः भीतोज्ञातिद्रोहात्। इतिप्रथमेद्वादशः॥

त्पथं ।

निर्गमोधृतराष्ट्रस्यविदुरोक्त्यात्रयोदशे।उक्तःपौत्राभिषेकेणवत्कुराज्ञोमहापथः॥इदानींपरीक्षितःकलिनिग्रहादिकर्माणिक
थयिष्यन्विदुरागमनेनधृतराष्ट्रप्रस्थानंततोऽर्जुनागमनंततःपांडवप्रस्थानंचनिरूपयतित्रिभिरध्यायैः।गतिंहरिं।तयात्मग
त्याप्राप्तअवाप्तंविवित्सितंज्ञातुमिष्टंसर्वंयेनसतद्वाह।यावतःकर्मयोगव्रतादिविषयान्प्रश्नान्प्रथमंकृतवान्।कौषारवस्यमैत्रेयस्य
पुरतःपश्चात्तत्रचतुरःप्रश्नार्थज्ञानमात्रेणगोविंदेजातैकभक्तिःकृतार्थंमन्वानस्तेभ्यःप्रश्नेभ्यउपररामततःपरंनविजिज्ञासितवान्।तंविदुरं

सूतउवाच॥विदुरस्तीर्थयात्रायांमैत्रेयादात्मनोगतिं॥ज्ञात्वागाद्धास्तिनपुरंतयावाप्तविवित्सितः॥१॥यावतःकृतवान्प्रश्ना
न्क्षत्ताकौषारवाग्रतः॥जातैकभक्तिर्गोविंदेतेभ्यश्चोपररामह॥२॥तंबंधुमागतंदृष्ट्वाधर्मपुत्रःसहानुजः॥धृ
तराष्ट्रोयुयुत्सुश्चसूतःशारद्वतःपृथा॥३॥गांधारीद्रौपदीब्रह्मन्सुभद्राचोत्तराकृपी॥अन्याश्चजामयःपांडोर्ज्ञात
यःससुताःस्त्रियः॥४॥प्रत्युज्जग्मुःप्रहर्षेणप्राणंतन्वइवागतं॥अभिसंगम्यविधिवत्परिष्वंगाभिवादनैः॥५॥मुमु
चुःप्रेमबाष्पौघंविरहौत्कंठ्यकातराः॥६॥राजातमर्हयांचक्रेकृतासनपरिग्रहं॥तंभुक्तवंतमासीनंविश्रांतंसु
खमासने॥७॥प्रश्रयावनतोराजाप्राहतेषांचशृण्वतां॥८॥

सूतःसंजयः।शारद्वतःकृपः।कृपीकृपस्यभगिनीद्रोणभार्या।जामयोज्ञातिभार्याः।अन्याश्चस्त्रियः।प्राणंतन्वइवेतिकुतश्चित्मूर्छादिदोष
तःप्राणेगतेमृतेवतनुःकरचरणाद्युदयेनिश्चेष्टाभवति।पुनस्तस्मिन्नाविर्भूतेयथोत्तिष्ठतीतितद्वत्।विरहेणयदौत्कंठ्यंते
नकातराविवशाः॥६

गत

भा०प्र

तं विदुरं पक्षिणो स्वपत्यानि यथा। तिष्ठ हे न पक्षच्छायया वर्द्धयंति तद्वत् युष्मत्पक्षपातच्छायया समेधिता। नु नः अस्मान् किं स्म
रथ॥ समेधितत्वमेवाह। विपद्गणात्। यस्मात् मोचिताः सा मातृका वा युष्माभिः। कया वृत्त्या वर्त्तितं देहवृत्तिः कृता॥ कानि च तीर्थादी
५२ निसेवितानीति॥ भवतां च तीर्थाटनेन स्वार्थं किं तु तीर्थानुग्रहार्थमित्याह। मलिनजनसंपर्केण तीर्थानि मलिनानि भवं

८

युधिष्ठिर उवाच॥ अपि स्मरथ नो युष्मत्पक्षच्छायासमेधितान्॥ विपद्गणाद्विषाग्न्यादेर्मोचिता यत्समातृकाः॥ कया
वृत्त्या वर्तितं वश्चरद्भिः क्षितिमंडलं॥ तीर्थानि क्षेत्रमुख्यानि सेवितानीह भूतले॥१०॥ भवद्विधा भागवतास्तीर्थ
भूताः स्वयं विभो॥ तीर्थीकुर्वंति तीर्थानि स्वांतस्थेन गदाभृता॥११॥ अपि नः सुहृदस्तात बांधवाः कृष्णदेवताः॥
दृष्टाः श्रुता वा यदवः स्वपुर्यां सुखमासते॥१२॥ इत्युक्तो धर्मराजेन सर्वं तत्समवर्णयत॥ यथानुभूतं क्रमशो
विना यदुकुलक्षयं॥१३॥ नन्वप्रियं दुर्विषहं नृणां स्वयमुपस्थितं॥ नावेदयत्सकरुणो दुःखितान्द्रष्टुमक्षमः॥ ५२
१४॥ कंचित्कालमथावात्सीत्सत्कृतो देववत्सुखं॥ भ्रातुर्ज्येष्ठस्य श्रेयस्कृत्सर्वेषां प्रीतिमावहन्॥१५॥ ॥

ति। अंतःस्थेन स्वयं तीर्थीकुर्वंति स्वांतं मनः तत्र स्थेन स्वसंपात स्थितेनेति वा॥ अपि किं सुखमासते। नु वैतिः क्वापि दृष्टाः श्रुता वा॥
यदुकुलक्षयावर्णने कारणमाह। नन्विति॥ श्रेयस्कृत् तत्त्वमुपादिशत्॥ ॥ कृष्णाय नमः॥ श्रीनृसिंहायेनमः॥ ॥ ॥ ॥

१३ १४

तथाकिर ४अमहो

नत्तु शूद्रो ऽसौ कथमुपदिशेत् ॥ न स सौ शूद्रः किंतु यमस्तद्रूपेणास्मीति ॥ किं तत्र कारणं । यमेवाद्यागते यमुक्तो ऽसौ दंडधर इत्यपे
क्षायामाह ॥ अबिभ्रदिति । धृतवानित्यर्थः ॥ मांडव्यस्य शापाद्वि ॥ केचिच्चौरानुधावंतो राजभटा मांडव्यस्याश्रमे तपस्विर
तः समीपे तेतान् संप्राप्य ते नस्ह निबध्य आनीय राज्ञो निवेद्य तदाज्ञया सर्वान् शूलमारोपयामासुः ॥ ततो राजा तमृषिं
ज्ञात्वा शूलादवतीर्य प्रसादयामास ॥ ततो मुनिर्यमं गत्वा कुपित उवाच ॥ कस्मादहं शूलमारोपित इति । तेनोक्तं बा
ल्ये शलभं कुशाग्रेणाविध्य क्रीडितवानिति ॥ तच्छ्रुत्वा मांडव्यस्तं शशाप बाल्ये ह्यजानतो मम हा तद्दंडयतस्त्वं

१६
अबिभ्रदर्यमा दंडं यथावदघकारिषु ॥ यावद्धर्मः स शूद्रत्वे शापात्तस्य वर्षशतं यमः ॥ युधिष्ठिरो लब्धराज्यो दृष्ट्वा
पौत्रं कुलंधरं ॥ भ्रातृभिर्लोकपालाभैर्मुमुदे परया श्रिया ॥ १७ ॥ एवं गृहेषु सक्तानां प्रमत्तानां तदीहया ॥
अत्यक्रामदविज्ञातः कालः परमदुस्तरः ॥ १८ ॥ विदुरस्तदभिप्रेत्य धृतराष्ट्रमभाषत ॥ राजन्निर्गम्यतां शीघ्रं
धेप पश्येदं भयमागतं ॥ १९ ॥ प्रतिक्रिया न यस्येह कुतश्चित्कर्हिचित्प्रभो ॥ स एष भगवान्कालः सर्वेषां नः
समागतः ॥ २० ॥ ॥

१६
कारितवान् ॥ अतः शूद्रो ऽभवदिति ॥ इदानीं राज्यापकर्षं निरूपयितुमुत्कर्षं निगमयति । युधिष्ठिर इति । कुलंधरं वंशधरं १७
तदीहया गृहव्यापारेण प्रमत्तानां ॥ अत्यक्रामदत्रायुःकालो ऽतिक्रांतः ॥ यद्वा तानत्यलंघयदित्यर्थः । अभिप्रेत्य ज्ञात्वा । १९
तत्प्रतीकारः क्रियतां ॥ किं निर्गमनेन तत्राह । प्रतिक्रियेति । सर्वेषामिति येषां प्रतिकर्तव्यं तेषामपीत्यर्थः ॥ २ ॥ छ ॥ ॥
उपाय२ युधिष्ठिरादिभिः।

देवो वा हन्त वो बाधव लीयः प्रतापवान् । येनावलोकितो मोऽया शक्तन्मृत्युं विमुञ्चति १२ अथापु २१ नार्हसि सान्त्व

सान्त्वनं तु कथं धनादिवियोगः शोकः । अत आह । येनैवेति अभिपन्नः अभिग्रस्तः । अत्रावस्थानमतिदैन्यमिति दर्शयन् वैराग्यमुत्पादयति । विशीर्ण

त्याह युति । पितृभ्रात्रेति स्पष्टमिति । आत्मा च देहः । येन पुत्रा हतास्तेन भीमेन दत्तं पिण्डं गृहपालः श्वेव गृहपालः श्वा निसृष्टः अग्नि दत्तो सन्दग्धि

५२ दत्तः गरो विषं । दूषिता अवमताः । तद्दत्तैस्तेनादितैर्लब्धैः असुभिः कियत्प्रयोजनं । न किंचिदित्यर्थः । तस्यापि एवं दैन्यमनुभव शरणं कथं

तोऽपि । परैति क्षीयते । गतस्वार्थं यशोधर्मादिशून्यं । मुक्तबंधनः त्यक्ताभिमानः । अगत इत्यविज्ञातगतिर्यस्य सः । धीरः । आ मुद्धृतः

येनचैवापिपन्नोयंप्राणैःप्रियतमैरपि ॥ जनःसद्योवियुज्येतकिमुतान्यैर्धनादिभिः ॥ २१ ॥ पितृभ्रातृसुहृ

त्पुत्राहतास्तेविगतंवयः ॥ आत्माचजरयाग्रस्तःपरगेहमुपाससे ॥ २२ ॥ अहोमहीयसीजंतोर्जीविताशा

ययाभवान् ॥ भीमापवर्जितंपिंडमादत्तेगृहपालवत् ॥ २३ ॥ अग्निर्निसृष्टोदत्तश्चगरोदाराश्चदूषिताःहृ

तंक्षेत्रंधनंयेषांतद्दत्तैरसुभिःकियत् ॥ २४ ॥ तस्यापितवदेहोयंकृपणस्यजिजीविषोः ॥ परैत्यनिच्छतोजी

र्णोजरयावाससीइव ॥ २५ ॥ गतस्वार्थमिमंदेहंविरक्तोमुक्तबंधनः ॥ अविज्ञातगतिर्जह्यात्सवैधीरउदाहृतः

॥ २६ ॥ यःस्वकात्परतोवेहजातनिर्वेदआत्मवान् ॥ हृदिकृत्वाहरिंगेहात्प्रव्रजेत्सनरोत्तमः ॥ २७ ॥ अथो ५२

दीचींदिशंयातुस्वैरज्ञातगतिर्भवान् ॥ इतोर्वाक्प्रायशःकालःपुंसांगुणविकर्षणः ॥ २८ ॥ १ ॥ ॥

२६

तद्दुःखस्य स्वयं सहनेन मुक्तिप्रार्थी नरोत्तमः । ततः आगेव कृतप्रतीकारः स्वकात् स्वत एव परतः परोपदेशतो वा । अथ

तु नरोत्तमो नान्तः । अतः इदानीं धीरो भवेत्याह । अथेति । अर्वाक् अर्वाचीनः एष्यन्नित्यर्थः । गुणान् धैर्यदयादीन् विकर्षति ।

२७ धीरा विकर्षतीत्यर्थः ॥ २८

आजमीढः आजमीढवंशजः प्रज्ञाचक्षुः अंधः एवं बोधितः सन् । इति स्नेहः स्निग्धदार्ढ्यात् । त्वया मंदर्शितः अध्वनमोदः
योमार्गीयस्य सतः स्वकुलस्य पुत्री गांधारी साध्वी सुशीला हिमालयं प्रयांतपतिमनुजगाम । कथं सा सुकुमारी हिमा
द्रिदुःखवक्कुलं हिमवंतं गता अत आह । न्यस्तदंडानां प्रहर्षाय यस्मिन्नृतं दुःखदमपि केषांचित् सहर्षहेतुर्भवती त्यत्रदृष्टं ।

त्यि

एवं राजा विदुरेणानुजेन प्रज्ञाचक्षुर्बोधितो आजमीढः ॥ छित्वा स्वेषु स्नेहपाशान् द्रढिम्नो निश्चक्राम सन्मा
र्गं मंदर्शितो ॥ अथ पतिं प्रयांतं सुवलस्य पुत्री पतिव्रता चानुजगाम साध्वी ॥ हिमालयं न्यस्तदंडप्रहर्षं मनस्वि

मेवसर्वं नामिव सत्संप्रहारौ ॥ अजातशत्रुः कृतमैत्रो हुताग्निर्विप्रान्नत्वा तिलगोभूमिरुक्मैः ॥ गृहं प्रविष्टो गुरु
वंदनाय न ताव पश्यत् पितरौ सौवलीं च ॥ ३३ ॥ तत्र संजयमासीनं पप्रच्छोद्विग्नमानसः ॥ गावल्गणे क्व नस्ता
तो वृद्धो हीनश्च नेत्रयोः ॥ ३४ ॥ अंबा च हतपुत्रार्ता पितृव्यः क्व गतः सुहृत् ॥ अपि मय्यकृतप्रज्ञे हतबंधुः स
भार्यया ॥ ३५ ॥ आशंसमानः शमलं गंगायां दुःखितो ऽपतत् ॥ पितर्युपरते पांडौ सर्वान्नः सुहृदः शि
शून् ॥ ३६ ॥ अरक्षतां व्यसनतः पितृव्यौ क्व गतावितः ॥ ३७ ॥ ॥

३२
तं मनस्विनां शूराणां युद्धं स्मरंती प्रहाराय यथा पाठं तत्र सत्संप्रहारं युद्धं यथेति ॥ कृतं मैत्रं मित्रदैवतं संध्यावंदनं येन
न ताव पश्यत् पितरौ विदुरधृतराष्ट्रौ ॥ हे गावल्गणे गावल्गणस्य पुत्र संजय ॥ अकृतप्रज्ञे मंदमतौ शमलं अपराधं अ
शंसमानः आशंकमानः ॥ भार्यया सह ॥ यो अरक्षतां तातो इतः स्थानात् ॥ लाक्षायनगृह ॥ रामायनमप ॥ ॥ ॥
३७

४=शोकात्रां तः क्षुधाविष्टः अष्टनारहितः पुमान् गुरुदेवद्विज...ीनां पूजनं नरः ...
तस्मिन्नंतरे विप्रनारदः प्र ... त्य इत्यपत वीणां त्रितंत्रीं ... भगवान् सहतुंबुरुः ॥ राज्ञा दत्ते
सा प्र

कृपयास्नेहवैक्लव्यादतिपीडितः आत्मेश्वरं धृतराष्ट्रमपश्यन् विरहकर्षितः अत एव संजयः न प्रत्युत्तरमाह ॥ आत्मनाबुद्ध्या आत्मा तत्र संप
त्मानं मनो विष्टभ्य धैर्यं युक्तं कृत्वा ॥ व्यवसितं धृतराष्ट्रस्य गांधार्याश्च व्यवसितं निश्चयं यतो मुषितः वंचितोऽस्मि ॥ एवं कंचित्कालं
शोचति तस्मिन् अथ नारद आजगाम ॥ अत्रास्ति कश्चित् शुश्रूषकः पाठान्तरं तदुल्लंघ्य यथास्मत्संप्रदायमाख्यायते ॥ शोकवेगाद्दस्य
र्चयामिवाह राजा न वास्तवं यत ४२ नाहं वेद्वेति ॥ अपारशोकार्णवे भगवान् त्वमेव पारदर्शकः अतो ब्रूहीति शेषः ॥ आदावे

५४ श्रीसूत उवाच ॥ कृपयास्नेहवैक्लव्यात्सूतो विरहकर्षितः ॥ आत्मेश्वरमचक्षाणो न प्रत्याहातिपीडितः ॥ ३८ ॥ विमृज्या
ऽश्रूणि पाणिभ्यां विष्टभ्यात्मानमात्मना ॥ अजातशत्रुं प्रत्यूचे प्रभोः पादावनुस्मरन् ॥ ३९ ॥ संजय उवाच ॥ ॥ ना
हं वेद व्यवसितं पित्रोर्वः कुलनंदन ॥ गांधार्या वा महाबाहो मुषितोऽस्मि महात्मभिः ॥ ४० ॥ अथाजगाम भग
वान्नारदः सहतुंबुरुः ॥ प्रत्युत्थायाभिवाद्याह सानुजोऽभ्यर्चयन्मुनिं ॥ ४१ ॥ राज्ञा दत्तोपनीतार्घ्यं प्रत्युत्थाय
निवेदितो ॥ परमासनमासीनेपारवेंडास्य नाषत ॥ ४२ ॥ युधिष्ठिर उवाच ॥ नाहं वेद गतिं पित्रोर्भगवन् क्व गतावितः ॥ अं ५४
बा वा हतपुत्रार्ता क्व गता च तपस्विनी ॥ ४३ ॥ कर्णधार इवापारे भगवान्पारदर्शनः ॥ अथाबभाषे भगवान्नारदो
मुनिसत्तमः ॥ ४४ ॥ मा कंचन शुचो राजन्यदीश्वरवशं जगत् ॥ लोकाः सपाला यस्येमे वहंति बलिमीशितुः ॥ स
संयुनक्ति भूतानि स एव वियुनक्ति च ॥ यथा गावो नसि प्रोतास्तंत्यां बद्धाः स्वदामभिः ॥ ४६ ॥ वाक्तंत्यां नामभिर्बद्धा व
हंति बलिमीशितुः ॥ यथा क्रीडोपस्कराणां संयोगविगमाविह ॥ ४७ ॥ इच्छया क्रीडितुः स्यातां तथैवेशेच्छया नृणां ॥ ॥ ४८

वयथा ... कथनेशोकेन मूर्छितं पुनरेदिति प्रथमं तावच्छोकमुपशमयति ॥ कंचन मा शुचः आशोचनं केवलं तानेव ॥ यद्यस्मादीश्व
राधीनं जगत् ॥ तदेवाह ॥ लोका इति ॥ घट्टात्पारतंत्र्यमुक्त्वा संयोगवियोगयोरप्याह ॥ यथेति ॥ क्रीडोपस्कराणां क्रीडासाधनानां ॥ ॥
४५ ४८

नाप्यध्रुवं

ईश्वराधीनत्वान्नशोकः कार्यइत्युक्तो लोकतत्वे चविचार्यमाणे निर्विषयो॥ यं शोकइत्याह। यद्यपि लोकं जनं ध्रुवं जीवरूपेण अध्रुवं देहरूपेण नचेति न ध्रुवं शुद्धब्रह्मरूपेण अनिर्वचनीयत्वेन वा॥ अनयं वा चिज्जडांशतः सर्वथापि तेषु ध्रुवेष्वपि तेष्विति पित्रादयः नशोच्याः॥ स्नेहादन्यत्र मोहं एव केवलं शोकहेतुर्भवता ज्ञानमूलहेतुर्यथा तस्मात् मां विना कथं ते वर्तेरन्निति मनस्तापं वैक्लव्यं वव्याकुलतां त्यज॥ तत्र च देहतस्ताषां त्राणं नैरित्यत आह कालो गुणश्चोत्पत्तिकः। कर्मजन्मनिमित्तं गुणा उपादानं तदधीनः पाञ्चभौतिकः जडः तद्धितां गोनाशवाच्य। सर्पग्रस्तः भुजगरगिलितः यथा अन्यनरक्षतीतिवत॥ ईश्वरेण विहितं वृत्तिं च सर्वतः सुलभवत्पाह। अहस्तानि पश्वादीनि अपदानि तृणादीनि तत्र तेषु च हस्तादिषु अपि फल्गूनि अल्पानि॥

यन्मन्यसे ध्रुवं लोकमध्रुवं वा न चोभयं॥ सर्वथा हि न शोच्यास्ते स्नेहादन्यत्र मोहजात्॥ ४९ ॥ तस्माज्जह्यंग वैक्लव्यम ज्ञानकृतमात्मनः॥ कथं त्वनाथाः कृपणा वर्तेरन् वनमाश्रिताः॥ ५० ॥ कालकर्मगुणाधीनो देहोऽयं पांचभौतिकः॥ कथमन्यांस्तु गोपायेत्सर्पग्रस्तो यथा परं॥ ५१ ॥ अहस्तानि सहस्तानामपदानि चतुष्पदां॥ फल्गूनि तत्र महतां जीवो जीवस्य जीवनं॥ ५२ ॥ तदिदं भगवान्राजन् एक आत्मात्मनां स्वदृक्॥ अंतरोऽनंतरो भाति

स्वप्रकाशकः

पश्य तं माययोरुधा॥ ५३ ॥

एवं जीवस्सर्वोपि सर्वस्य जीवनं जीविका एतेनैव सर्वतो मृत्युग्रस्तत्वं चोक्तं मोहनिवृत्त्यर्थं तस्यावस्तुत्वमाह। तदिदं अहस्तं महस्तादिरूपं जगत् स्वदृग् भगवानेव नतु ततः पृथक् स एक एव न तु नाना॥ ननु सजातीयविजातीयभेदः स्वगतभेदः कुत एतत्त्वं हा आत्मानां नानात्मनां आत्मा स्वदृक् अतो न सजातीयभेदः अंतरा अनंतरः अंतर्बहिश्च लोकरूपश्च भाति अतो न विजातीयभेदो पि॥ ननु एकः कथं तथा प्रतीयते अत आह। मायया बहुधा तं पश्येति॥ ष्णुं सद्गायननमः॥ वासुदेवायनमः॥

वी०त्र

कामावस्थीहशोमहामायाविद्रावकायामित्याह॥सोऽयमिति॥अस्यांभुविअभावायनाशाय॥तर्हिश्रीकृष्णोऽत्रास्तीत्य
त्रैवास्थ्यामाकथ्याइत्याह॥तत्रदेवानांकार्यंतेननिष्पादितंकेवलमवशेषंप्रतीक्षते॥यदुकुलक्षयमितिहृदिस्थितंततो
तिनंक्ष्यमयास्यतितदतोयूयमपिगृहस्थितेत्यर्थः॥तत्कुलक्षयमपिविदुरःस्वदेवनावर्णयन्॥तद्वृशोकत्यागस्थावानिवार्यस्त्विति
५५ मवतस्मैयथावृत्तंकथयति॥धृतराष्ट्रइतिषड्भिः॥हिमवतोदक्षिणभागे॥यावैस्वर्धुनीसप्तधाव्यधात्आत्मानंयत्कृत
सप्तधाव्यधात॥किमर्थंनानापृथक्सप्तानांस्रोतोभिःप्रवाहैःसप्तानामृषीणांप्रीतये॥अतएवतत्तीर्थंसप्तस्रोतोवदन्ति ५७

सोऽयमद्यमहाराजभगवान्भूतभावनः॥कालरूपोऽवतीर्णोऽस्यामभावायसुरद्विषां॥५४॥निष्पादितंदेवकृत्य
मवशेषंप्रतीक्षते॥तावद्यूयमवेक्षध्वंभवेद्यावदिहेश्वरः॥५५॥धृतराष्ट्रःसहभ्रात्रागांधार्याचस्वभार्यया॥द
क्षिणेनहिमवतऋषीणामाश्रमंगतः॥५६॥स्रोतोभिःसप्तभिर्यावैस्वर्धुनीसप्तधाव्यधात॥सप्तानांप्रीतये
नानासप्तस्रोतःप्रचक्षते॥५७॥स्नात्वानुसवनंतस्मिन्हुत्वाचाग्नीन्यथाविधि॥अब्भक्षउपशान्तात्मा ५५
सआस्तेविगतैषणः॥५८॥जितासनोजितश्वासःप्रत्याहृतषडिंद्रियः॥हरिभावनयाध्वस्तरजःसत्त्व
तमोमलः॥५९॥

तेनकृतंअष्टांगयोगमाह॥स्नात्वेतिचतुर्भिः॥तत्रस्नानहोमौ।ऽब्भक्षणंचनियमाउक्ताः॥तत्रस्थानेऽप्यपांस्वीकारादनुक्ता
उपशान्तआत्मायस्य॥विगताउक्तादूषणायस्मादितियमाउक्ताः॥जितासनइत्यादिनाआसनप्राणायामप्रत्याहारा
उक्ताः॥हरिभावनयातिधारणोक्ता॥ध्वस्ताःरजःसत्त्वतमोरूपामलायस्येतिफलतोध्यानमुक्तं॥तत्स्थायनमः॥

५९

जीवे २ श्री ध्रे २

समाधिमाह। विज्ञानेतिद्वाभ्यां। आत्मानमहंकारास्पदं स्थूलदेहाद्वियोज्य विज्ञानात्मनि बुद्धौ। संयोज्य एकीकृत्य तं विज्ञानात्मानं दृश्यरूपा
शाद्वियोज्य क्षेत्रज्ञे द्रष्टरि प्रविलाप्य तं च क्षेत्रज्ञं दृश्यांशाद्वियोज्य आधारे आश्रयभूते ब्रह्मणि प्रविलाप्य घटांबरं घटोपाधेर्वियोज्य
यथा महाकाशे प्रविलाप्यते तद्वत्। व्युत्थानाभावमाह। ध्वस्तेति। अंतर्गुणक्षोभो बाह्यो बहिरिंद्रियविक्षेपाद्यं व्युत्थानं सर्वं [illegible]
दुत्थं तस्य नास्ति। यतः ध्वस्तो मायागुणानामुदर्कः उत्तरं फलं वासना यस्य। निरुद्धानि करणानि चक्षुरादीनि आशयाम
नश्च यस्य। अत एव निवर्तितः अखिल आहारो भोगः इंद्रियैर्विषयाहरणं वा येन सः। स्थाणुरिव निश्चल आस्ते तथापि तमप्या ५९

विज्ञानात्मनि संयोज्य क्षेत्रज्ञे प्रविलाप्य तं॥ ब्रह्मण्यात्मानमाधारे घटांबरमिवांबरे॥५८॥ ध्वस्तमायागुणोद
र्को निरुद्धकरणाशयः॥ निवर्त्तिताखिलाहार आस्ते स्थाणुरिवाऽधुना॥५९॥ तस्यांऽतरायो मैवाभूः संन्यस्ता
खिलकर्मणः॥ स वा अद्यतनाद्राजन्परतः पंचमेऽहनि॥६०॥ कलेवरं हास्यति स्वं तच्च भस्मीभविष्यति॥ दह्य
मानेऽग्निभिर्देहे पत्युः पत्नी सहोटजे॥६१॥ बहिः स्थिता पतिं साध्वी तमग्निमनुवेक्ष्यति॥ विदुरस्तु तदाश्चर्यं नि
शाम्य कुरुनंदन॥६२॥ हर्षशोकयुतस्तस्माद्गंता तीर्थनिषेवकः॥ इत्युक्त्वाऽथारुहत्स्वर्गं नारदः स
हतुंबुरः॥६३॥ युधिष्ठिरो वचस्तस्य हृदि कृत्वाजहाच्छुचः॥६४॥ इति श्रीभागवते प्रथमस्कंधे त्रयोदशोऽध्यायः॥
[illegible]

नेत्युत्तरार्धं तत्प्रत्याह। तस्येति। अंतरायो विघ्नो मैवाभूरित्यडागमश्छांदसः। दर्शनमपि तावत्कुर्यामित्युद्यतं प्रत्याह। स वा अद्यतनादिति
स्वाधीनं तर्हि तद्दहनार्थं गमिष्यामीत्याह। तच्चेति। तर्हि गांधार्यानयनार्थं गमिष्यामीत्याह। पत्युरिति। सहोटजे पर्णशालायां
हितया गार्हपत्यादिभिरग्निभिर्दह्यमाने तस्य पत्नी बहिः स्थिता सती तं पतिमनुप्रविशंतमग्निं वेक्ष्यति प्रवेक्ष्यति। तर्हि विदुरान
यनार्थं गंतव्यमेवेत्याह। विदुरस्त्विति। निशाम्य दृष्ट्वा भ्रातुः सुगत्या हर्षः तन्मृत्युना शोकः ततः स्यात् [illegible] तस्मात्स्थानात् [illegible] ॥
यत्रासौ वितुं गंता गमिष्यति स्वचः शोकान्॥ त्रयोदशः॥
सं १

सा॰ प्र

५६

वर्तुर्द्दशेत्व रिष्टानि दृष्ट्वा राजा विशंकितः ॥ अस्पष्टेणोदर्ज्जुनाच्छ्कृष्णस्य तिरोधानमितीर्यते ॥१॥ श्रीकृष्णस्य चेतिव कारेण ॥
लिप्रायं च ज्ञातु ॥१॥ कतिचित् मसास्तदा कालातिक्रमे ऽपि ततः द्वारकातो नायात् नागतः ॥ निमित्तानि उत्पातान् कुरू
द्वहो युधिष्ठिरः ॥२॥ रौद्रां घोरां तद्देवाह । विपर्यस्ता ऋतुधर्मा यस्मिन् तस्य वार्त्तां जीविकां क्रोधलोभानृतैर्युक्तैरा
त्मा येषां ॥३॥ जिह्मप्रायं कपटव्यवहृतं व्यवहारे शाठ्यं वंचनं तन्मिश्रं सौहृदं सख्यं । पित्रादीनां स्वप्रातियां मि

सूतउवाच ॥ संप्रस्थिते द्वारकायां जिष्णौ बंधुदिदृक्षया ॥ ज्ञातुं च पुण्यश्लोकस्य कृष्णस्य च विचेष्टितं ॥१॥ व्यती
ताः कतिचिन्मासास्तदा नायात्ततोऽर्जुनः ॥ ददर्श घोररूपाणि निमित्तानि कुरूद्वहः ॥२॥ कालस्य च गतिं रौद्रां वि
पर्यस्तर्तुधर्मिणः ॥ पापीयसीं नृणां वार्तां क्रोधलोभानृतात्मनां ॥३॥ जिह्मप्रायं व्यवहृतं शाठ्यमिश्रं च सौहृदं
पितृमातृसुहृद्भ्रातृदंपतीनां च कल्कनं ॥४॥ निमित्तान्यत्यरिष्टानि काले त्वनुगते नृणां ॥ लोभाद्यधर्मप्रकृति
दृष्ट्वोवाचानुजं नृपः ॥५॥ युधिष्ठिर उवाच ॥ संप्रेषितो द्वारकायां जिष्णुर्बंधुदिदृक्षया ॥ ज्ञातुं च पुण्यश्लो
कस्य कृष्णस्य च विचेष्टितं ॥६॥ गताः सप्ताधुना मासा भीमसेन तवाऽनुजः ॥ नायाति कस्य वा हेतोर्नाहं वेदे
दमंजसा ॥७॥ अपि देवर्षिणाऽऽदिष्टः स कालोऽयमुपस्थितः ॥ यदाऽऽत्मनोऽगमाक्रीडं भगवानुत्सिसृक्षति ॥८॥ ५६

ति कल्कनं कलहादि ॥४॥ अत्यरिष्टानि अत्यंत मंगलानि दृष्ट्वा नृणां लोभाद्यधर्मप्रकृतिं च दृष्ट्वा अनुजं भीमं । चेति वितर्के । जिष्णुर अर्जुनः
कस्माद्धेतोर्नायातीत्यहं न वेद्मि ॥७॥ अपि किं यद आत्मनः आक्रीडं क्रीडासाधनं अंगं मनुष्यनाट्यं उत्स्रष्टुमिच्छति यः कालः
प्राप्तः ॥ ॥८

अस्माकं सर्वं पुरुषार्थं हि तु श्रीकृष्णः अतस्तादृशियोगं विना निष्टं नस्मादित्याशयेनाह ॥ यस्मात् श्रीकृष्णाद्धेतोः । एतच्छ परिष्टाद
स्वादियस्र सुनः स्पष्टीकरिष्यति ॥ लोकास्त्वयज्ञकरणरूपायस्यानुग्रहात् ॥ अदूरासंनिहितेनोस्माकं आसंशतः ॥ उत्पातानदैहिका
नाह ॥ ऊर्ध्वदृश्येयावामास्फुरतिवेपथुः कंपश्चहृदयेत्वत्ति ॥ एतमरसग्रेगतमनिर्दिष्टंविप्रियंदास्यति ॥ सोमानाह ॥ स्मार्द्दस्त्रितिः ॥ शिवा
क्रोष्ट्री आदित्यमभिरोरौति उच्चस्तृयोस्मिमुखं वक्रोशति ॥ अनलाननो अग्निमुखेन वमंती ॥ अंगहेसोममामभिलक्ष्य सारमेयः श्वा

त

यस्मान्नः संपदो राज्यं दारा प्राणाः कुलं प्रजाः ॥ आसन्नसपत्नविजयो लोकाश्च यदनुग्रहात् ॥ ९ ॥ पश्योत्पातान्नरव्या
घ्र दिव्यान्भौमान्सदैहिकान् ॥ दारुणानुशंसतोऽदूराद्भयं नो बुद्धिमोहनं ॥ १० ॥ ऊर्व्वक्षिबाहवोमह्यं स्फुरंत्यंग पुनः
पुनः ॥ वेपथुश्चापि हृदये आराद्दास्यंति विप्रियं ॥ ११ ॥ शिवैषोद्यंतमादित्यमभिरौत्यनलानना ॥ मामंग सारमेयो
यमभिरौति अभीरुवत् ॥ १२ ॥ शस्ताः कुर्वंति मां सव्यं दक्षिणं पशवोऽपरे ॥ वाहांश्च पुरुषव्याघ्र लक्षये रुदतो मम ॥ १३ ॥ मृत्युदूतः कपोतोयमुलूकः कंपयन्मनः ॥ प्रत्युलूकश्च कुह्वानैरनिद्रौ शून्यमिच्छतः ॥ १४ ॥ धूम्रा दि
शः परिधयः कंपते भूः सहाद्रिभिः ॥ निर्घातश्च महानासीत्साकं च स्तनयित्नुभिः ॥ १५ ॥ वायुर्वाति खरस्पर्शो रजसा
विसृजंस्तमः ॥ १६ ॥
१२
सौति ॥ स्तुतं लक्षतिरौति इति ॥ अभीरुवत् निःशंकं शस्ताः गवादयो मां सव्यं वामं कुर्वंति ॥ अपरे गर्द्दभाद्याः प्रदक्षिणं कुर्वंति ॥ वाहा
न् अश्वान् ॥ अयं कपोतो मृत्युदूतो मृत्युसूचकः उलूको घूकः प्रत्युलूकः तत्प्रतिपक्षोऽलूकः काकाः वा कुह्वानैः कुत्सितश
ब्दैः विश्वस्य शून्यमिच्छतः ॥ धूम्राः धूम्रवर्णाः दिशः परिधयः इवाग्निलोकमाहरण्वतीर्दिव्यानाह ॥ स्मार्द्धस्त्रिभिः ॥ निर्घातानिरभ्रवज्रपातः स्त
घ
नयित्नवो गर्जितानि तैः सह तमः विशेषेण सृजन् ॥ ॥ १६

ना॰ प्र

अस्तकरस्तंकसदाणंगमर्द्दयुद्धं ॥१६॥ नतारूढानुचराःतेषांगणैःसंकुलैःर्मामिश्रैःआणिलिःसंहितैःरोदसीद्यावापृथिव्यौ सं ज्व
५७ लितेदीप्तेइवचपश्यति ॥ पुनर्नर्मामानाह ॥ नघइतिमाद्वैमिश्रितिःआणिनामंनामिच ॥१७॥ हुसंतीतिकर्मकर्त्तर्योर्षनंसुकुवती
त्यर्थः ॥ १८ ॥ देवतानिग्रतिमाः ॥ १९ ॥ अधंतुःस्वपतेःस्नुत्वा २० नविद्यतेअन्येषुपुरुषेषुश्रीर्वेषां कुशादिशोतायषांतेर्भगवतः

अस्मकवर्षतिजलदावीलस्रमिवसर्वतः ॥ स्तूर्यहतप्रतंपश्यपश्यहमर्दमिथोदिवि ॥ १७ ॥ ससंकुलैर्भूतगणैर्ज्वलितेइव
रोदसी ॥ नघानदाश्चप्रललिताःमराम्भिवमनांमिच ॥ १८ ॥ नह्युलत्यग्निराज्यनकालोयंकिंविधास्यति ॥ नापिवृतिस्त्व
नंवृक्षानुदुस्यंतिचमातरः ॥ १९ ॥ रुदंत्यश्रुमुखागावोनानुप्रर्वत्पलाबज्ञो ॥ देवतानिरूदंतीवस्विद्यंतिसुचलंतिच ॥
क्रीडाकरः ॥ २० ॥ इमेजनपदाग्रामाःपुरोद्यानाकराश्रमाः ॥ भ्रष्टश्रियोनिरानंदाःकिमघंदर्शयंतिनः ॥ २१ ॥ मन्यएतैर्म ५७
हत्पातैर्नूनंभगवतःपदैः ॥ अनन्यपुरुषश्रीभिर्हीनाभूर्हतसौभगा ॥ २२ ॥ इतिचिंतयतस्तस्यदृष्टारिष्टेनचेतसा ॥ रा
ज्ञःप्रत्यागमद्ब्रह्मन्यदुपुर्याःकपिध्वजः ॥ २३ ॥ तंपादयोर्निपतितमयथापूर्वमातुरं ॥ अधोमुखमश्रुबिंदून्सृ
जंतंनयनाब्जयोः ॥ २४ ॥ विलोक्योद्विग्नहृदयोविच्छायमनुजंनृपः ॥ पृच्छतिस्मसुहृन्मध्येसंस्मरन्नारदेरितं ॥ २५ ॥
युधिष्ठिरउवाच ॥ कच्चिदानर्तपुर्यांनःस्वजनाःसुखमासते ॥ मधुभोजदशार्हार्हाःसात्वतांधकवृष्णयः ॥ २६ ॥ ॥ ॥

पद्वैर्हीनाभूरित्यहंमन्ये ॥ २१ ॥ तस्यराज्ञःइत्येवंदृष्टानिअरिष्टानियेनतेनचेतसाचिंतयतःसतः ॥ अयथापूर्वंनिपतितं ॥ तदेवाह ॥ आ
तुरमित्यादिस्त्रिभिःपादैः ॥ बिंदून्अश्रूणिनेत्राभ्यांविसृजंतमित्यर्थः ॥ [illegible]पितहृदयमपिविच्छायंविगतकांतिं ॥ ॥ ॥ ॥ ॥ छ ॥
२३ २४ २५

एवमितिस्मृतोक्तिः। अतिदृढेनस्नेहेनचिंतयतोमतिःशांताविशोकाविमलाविरजाचासीत्॥२६॥मतिवैमल्यफलमाह॥वासुदेवांघ्र्यनु
ध्यानेनपरिबृंहितंरंहोवेगोयस्याःतयानिर्मथिताउन्मूलिताअशेषाःकषायाःकामादयोयस्याःसाधिषणाबुद्धिर्यस्यसः॥२७॥ज्ञा
नंपुनरध्यगमदित्युत्तरेणान्वयः॥कालकर्मेति।तमसामोहेनलीनविशेषेनरुद्धमावृतंस्मरत्॥२८॥ज्ञानफलमाह॥विशोकइति।एतदेव
शोकहेतुत्वेनाविनोपपादयति।शोकस्यहिहेतुर्द्वैतभ्रमः॥तस्यदेहः तस्यलिंगंतस्यगुणाःतेषामविघातःब्रह्मसंपत्त्याब्रह्माहमिति
ज्ञानेनलीनाप्रकृतिरविद्यायस्मिन्तन्नैर्गुण्यंभवतिनतुसुषुप्तिप्रलययोरिवाविद्याशेषःतस्मान्नैर्गुण्यात्कारण॰कार्यलिंगनाशः

सूतउवाच॥एवंचिंतयतोजिष्णोःकृष्णपादसरोरुहं॥सौहार्देनातिगाढेनशांताऽसीद्विमलामतिः॥२६॥वासुदेवांघ्र्य
नुध्यानपरिबृंहितरंहसा॥भक्त्यानिर्मथिताशेषकषायधिषणोऽर्जुनः॥२७॥गीतंभगवताज्ञानंयत्तत्संग्राममूर्द्धनि॥
कालकर्मतमोरुद्धंपुनरध्यगमद्विभुः॥ २८ विशोकोब्रह्मसंपत्त्यासंछिन्नद्वैतसंशयः॥ ॥लीनप्रकृतिनैर्गुण्यादलिं
गत्वादसंभवः॥ २९ निशम्यभगवन्मार्गंसंस्थांयदुकुलस्यच॥ ॥स्वःपथायमतिंचक्रेनिभृतात्मायुधिष्ठिरः॥३०॥

अलिंगत्वाच्चासंभवःसंसारप्ररोहोयस्यभवतिपुनरितिसंभवःस्थूलशरीरंतद्रहितःततश्चतत्परिच्छेदाभावात्संछिन्नोद्वैतलक्ष
णःसंशयोभ्रमोयस्यसःविशोकोजातइति॥२९॥भगवतोमार्गमालक्ष्ययदुकुलस्यसंस्थांनाशंश्रुत्वानारदोक्तंचानुस्मृत्यस्वः
पथायस्वर्गमार्गायनिभृतात्मानिश्चलचित्तः॥ ॥३०॥

ना॰प्र तांदुर्विज्ञेयां॥ वक्ष्यतीतिहि॥ मोदामिन्यायथाऽकाशेयांतपाहिचाऽघमंडलं॥ गतिर्नलक्ष्यतेमत्स्यैस्तथाकृष्णस्यैवैतैरिति॥ संसृतेस्तुपररामजीवन्मु
क्तावस्थवदेहंजहाविति वा॥३१॥ तदेवमुक्तमपियादवस्यभगवतोकलत्रणपमबुध्यतस्माम्प्रवदतोमंदमतीन्प्रतिबलक्षणंस्पष्टयतिय
६२ या॥ ययायाद्रूपयातन्वाभुवोभारंकंटकेनकंटकमिवाहरत्॥ यादवतनुःस्थूलारतनुश्चेतिद्वयमपिईश्वरस्यसमंदार्थ्यचिनसममेव॥३२
श्रीकृष्णमूर्तेर्विशेषमाह॥ यथेति॥ तान्यपियथाधत्तेजहातिच॥ तदाह॥ यथानटोनिजरूपेणास्थितायथास्तूपांतराणिधत्तेऽन्तर्दधातिच।

तथाऽप्यनुस्मृत्यधनंजयोदितंनाप्रीयद्भूनांभगवत्कृतिंवतां॥ एकांतभक्त्याभगवत्यधोक्षजेनिवेशितात्मोपरराम संसृतेः॥ पा॰लि
॥३१॥ ययाहरद्भुवोभारंतांतनुंविजहावजः॥ कंटकंकंटकेनेवद्वयंचाऽपीशितुःसमं॥३२॥ यथामत्स्यादिरूपाणिधत्तेजह्या
धर्म द्यथानटः॥ भूभारःक्षपितोयेनजहौतच्चकलेवरं॥३३॥ यदामुकुंदोभगवानिमांमहींजहौस्वतन्वाश्रवणीयसत्कथः।
तदाहरेवाऽप्रतिबुद्धचेतसामभद्रहेतुःकलिरन्ववर्तत॥३४॥ युधिष्ठिरस्तत्परिसर्पणंबुधःपुरेचराष्ट्रेचगृहेतथात्म
नि॥ विभाव्यलोभानृतजिह्महिंसनाद्यधर्मचक्रंगमनायपर्यधात॥३५॥ ६२

तथातदपिकलेवरंजहौ॥ अंतरधादित्यर्थः॥३३॥ युधिष्ठिरस्यस्वर्गारोहणप्रसंगायकलिप्रवेशमाह॥ यदेति॥ स्वतन्वाजहौ॥ स्वतनोरेववैकुं
ठारोहात्॥ श्रवणार्हासतीकथायस्य॥ तदा हस्ताम्मिन्नेवअहरितिलुप्तसप्तम्यंतंपदं अप्रतिबुद्धचेतसामितिविवेकिनं।
तुनमत्पुरितिस्तुकं॥ अन्ववर्ततेति पूर्वमंशेनप्रविष्टः स्पष्टेनरूपेणानुवर्तितिकक्षा॥३४॥ बुधोयुधिष्ठिरस्तस्यकलेःपरिसर्पणंऽस
मरणंविलोक्यकंपन्तं॥ लोभाद्यधर्मचक्रंयस्मिन्नृजिह्मंकौटिल्यं॥ पर्यधात्॥ तद्गुवितंपरिधानमकरोत्॥३५॥ ॥ ॥

आत्मानः स्वस्यगुणैस्तुसमं अतिमहत्वं ॥ तोयं सर्वतः स्थितं समुद्रोदकमेव नीवीपरिधानविशेषो यस्याः तस्याः क्षोणेः पतित्वेनालिंगितवान् ॥ ३६
वज्रं अनिरुद्धस्य पुत्रो निरुद्धस्तद्वत् इत्यर्थः ॥ अपिबत् । आत्मन्यारोपयामास ईश्वरः समर्थः संछिन्नान्यशेषाणि बंधनानि उपाधयो येन ॥ ३८
तदेव दर्शयति द्वाभ्यां वाचमिस्तुपलक्षणं ॥ सर्वेंद्रियाणि मनसि संविलापितवानित्यर्थः । तच्च मनः प्राणे प्राणाधीनत्वात् तं प्राणं इतरे
अपाने तेनाकर्षणात् ॥ अपानव्यापार उत्सर्गः तत्सहितमपानं मृत्यो तदधिष्ठातृदेवतायां अनेनैव वागादिष्वपि तत्कर्मसाहित्यं ज्ञेयं ॥ तं मृ

नत्रवमं ... नवमं १ सम्पूर्नं १

स्वराड्रूपोऽयं विनियतमात्मनोऽनवमं गुणैः ॥ तोयनीव्याः पतिं भूमेस्तस्य पिबन्नाज्ञाक्रये ॥ ३६ ॥ मधुरायां तथा वज्रं स्वस्मेनप
तिं ततः ॥ प्राजापत्यां निरूप्येष्टिमग्नीनपिबदीश्वरः ॥ ३७ ॥ विसृज्य तत्र तत्सर्वं दुकूलवलयादिकं ॥ निर्ममो निरहंकारः
संछिन्नाशेषबंधनः ॥ ३८ ॥ वाचं जुहाव मनसि तत्प्राण इतरे च तं ॥ मृत्यावपानं सोत्सर्गं तं पंचत्वे ह्यजोहवीत् ॥ ३९ ॥ त्रि
वृत्त्वा च पंचत्वं तच्चैकत्वेऽजुहोन्मुनिः ॥ सर्वमात्मन्यजुहवीद्ब्रह्मण्यात्मानमव्यये ॥ ४० ॥ ४० ॥

तं पंचत्वे पंचतत्त्वानामैक्यो देहे । देहस्यैव मृत्युर्नात्मन इति सावितवानित्यर्थः ॥ अजोहवीदिति यङ्लुगन्तात् लुङि रूपं ॥ त्रिवृत्त्वे गुणत्रये
तच्चात्रिवृत्त्वं एकत्वे अविद्यायां सर्वं सर्वारोपहेतुमविद्यां आत्मनि जीवे अजोहवीदिति विकल्पे अजुहवीदित्यार्षं एवं शोधितमात्मा
नं ब्रह्मणि अव्यये कूटस्थेन तत्स्वरूपान्यत्र लय इत्यर्थः ॥ ॥ ॥

तदेवमात्मप्रतिपत्तिमुक्त्वावासस्थितिमाह ॥ चीरवासा इति द्वाभ्यां ॥ बद्धवाङ् मौनी ॥ ४१ ॥ अनवेक्षमाणः अनुजादिप्रतीक्षामकुर्वन् ॥ आशां गत पूर्वां पूर्वैर्ब्रह्म
विष्टैः यतः यां दिशं ॥ अधर्ममित्रेण यस्य तेन ॥ साधुकृताः सर्वे अर्था धर्मादयो यैः अत एव वैकुण्ठस्य चरणाम्बुजमेव आत्यन्तिकं शरणं ज्ञात्वा च ॥ कथं तत्पदे विधू
तकल्मषाणामस्थानां निवासस्थानं ॥ यतः यस्मिन् विरजेनात्मनैव प्राप्तुः न तु षोडशकलेन लिङ्गेन ॥ गतेर्वा विशेषणं विरजेनात्मनैवावस्थानरूपां ॥

चीरवासा निराहारो बद्धवाङ् मुक्तमूर्द्धजः ॥ दर्शयन्नात्मनो रूपं जडोन्मत्तपिशाचवत् ॥ ४१ ॥ अनवेक्षमाणो निरगादशृण्वन् बधिरो यथा ॥
उदीचीं प्रविवेशाशां गतपूर्वां महात्मभिः ॥ ४२ ॥ हृदि ब्रह्म परं ध्यायन्नावर्तेत यतो गतः ॥ सर्वे तमनुनिर्जग्मुर्भ्रातरः कृतनिश्चयाः ॥ ४३ ॥
कलिनाऽधर्ममित्रेण दृष्ट्वा स्पृष्टाः प्रजा भुवि ॥ ते साधुकृतसर्वार्था ज्ञात्वाऽत्यन्तिकमात्मनः ॥ ४४ ॥ मनसा धारयामासुर्वैकुण्ठचर
णाम्बुजं ॥ तद्ध्यानोद्रिक्तया भक्त्या विशुद्धधिषणा मुने ॥ ४५ ॥ तस्मिन्नारायणपदे एकान्तमतयो गतिं ॥ अवापुर्दुरवापां ते असद्भि
र्विषयात्मभिः ॥ ४६ ॥ विधूतकल्मषाः स्थानं विरजेनात्मनैव हि ॥ विदुरोऽपि परित्यज्य प्रभासे देहमात्मवान् ॥ ४७ ॥ कृष्णावेशेन तच्चित्तः ६४
पितृभिः स्वक्षयं ययौ ॥ द्रौपदी च तदाऽज्ञाय पतीनामनपेक्षतां ॥ ४८ ॥ वासुदेवे भगवति ह्येकान्तमतिराप तत् ॥ यः श्रद्धयैतद्भगव
त्प्रियाणां पाण्डोः सुतानामिति संप्रयाणं ॥ शृणोत्यलं स्वस्त्ययनं पवित्रं लब्ध्वा हरौ भक्तिमुपैति सिद्धिं ॥ ४९ ॥ इति श्रीभागव
ते महापुराणे प्रथमस्कन्धे पञ्चदशोऽध्यायः ॥ ॥ पाण्डवप्रयाणो ॥ १

तिं ते विधूतकल्मषाः ॥ प्रापुरिति ॥ ४६ ॥ तीर्थान्यटन् प्रभासे श्रीकृष्णावेशेन कृष्णे चित्तसमावेशेन देहं परित्यज्य तत्र विदुरः स्वमूर्तं तदानीं नेतुमागतैः
पितृभिः सह स्वक्षयं स्वाधिकारस्थानं ययौ ॥ द्रौपदी च भर्तॄणामनपेक्षतां तदा ज्ञात्वा आप ॥ इति पाण्डवानां प्रयाणं ॥ अलमतिशयेन स्वस्त्य
यनं मङ्गलास्पदं अलं पवित्रं च ॥ प्रथमे पञ्चदशः ॥ १५ ॥

सवानजानात्येव तथापि वक्ष्यामीत्याह॥ येन हेतुभूतेन च चतुर्भिः पादैर्वर्त्तमानेन च सत्यादयो गुणा न वियंति निर्लीयंते तेन श्रीनिवासेन रहितं लो
कं शोचामीति पृष्टेनान्वयः॥ सत्यं यथार्थभाषणं॥ शौचं शुद्धत्वं दयापरदुःखासहनं॥ क्षांतिः क्रोधप्राप्तावपि चित्तस्य यमनं॥ त्यागः अर्थिषु मु
क्तहस्तता॥ संतोषः अलंबुद्धिः॥ आर्जवं अवक्रता॥ शमो मनोनैश्चल्यं॥ दमो बाह्येंद्रियनैश्चल्यं॥ तपः स्वधर्मः॥ साम्यं शत्रुमित्रादिषु तुल्यता तितिक्षा
पराधसहनं॥ उपरतिर्लाभप्राप्तावौदासीन्यं॥ श्रुतं शास्त्रविचारः॥२६॥ ज्ञानमात्मविषयं॥ विरक्तिर्वैतृष्ण्यं॥ ऐश्वर्यं नियंतृत्वं शौर्यं संग्रामे उ
त्साहः॥ तेजः प्रभावः॥ बलं दक्षत्वं॥ स्मृतिः कर्तव्याकर्तव्यार्थानुसंधानं॥ स्वातंत्र्यं अपराधीनता॥ कौशलं क्रियानिपुणता॥ कांतिः सौंदर्यं धैर्य

धरण्युवाच॥ स वा हि वेद तत्सर्वं यन्मां धर्मानुपृच्छसि॥ चतुर्भिर्वर्त्तसे येन पादैर्लोकसुखावहैः॥२७॥ सत्यं शौचं दया क्षांतिस्त्यागः संतो
षश्चार्जवं॥ शमो दमस्तपः साम्यं तितिक्षोपरतिः श्रुतं॥२८॥ ज्ञानं विरक्तिरैश्वर्यं शौर्यं तेजो बलं स्मृतिः॥ स्वातंत्र्यं कौशलं कांति (margin: निःसेनगंधैः मार्दवं २)
धैर्यमार्दवमेव च॥२९॥ प्रागल्भ्यं प्रश्रयः शीलं सह ओजो बलं भगः॥ गांभीर्यं स्थैर्यमास्तिक्यं कीर्तिर्मानोऽनहंकृतिः॥३०॥ इमे चाऽन्ये
च भगवन्नित्या यत्र महागुणाः॥ प्रार्थ्या महत्त्वमिच्छद्भिर्न वियंति स्म कर्हिचित्॥३१॥ तेनाहं गुणपात्रेण श्रीनिवासेन सांप्रतं॥ शोचा
मि रहितं लोकं पाप्मना कलिनेक्षितं॥३२॥ आत्मानं चाऽनुशोचामि भवंतं चाऽमरोत्तमं॥ देवान्पितॄनृषीन्साधून्सर्वान्वर्णांस्तथाश्रमान्॥३३॥

मव्याकुलता॥ मार्दवं चित्ताकाठिन्यं॥ प्रागल्भ्यं प्रतिभातिशयः॥ प्रश्रयो विनयः॥ शीलं सुस्वभावः॥ सह ओजो बलानि मनसः ज्ञानेंद्रियाणां क
र्मेंद्रियाणां च पाटवानि॥ भगः भोगास्पदत्वं॥ गांभीर्यं अक्षोभ्यत्वं॥ स्थैर्यं अचंचलता॥ आस्तिक्यं श्रद्धा॥ कीर्तिर्यशः॥ मानः पूज्यत्वं॥ अनहंकृतिः
गर्वाभावः॥ एतैः पंचचत्वारिंशत् अन्ये च ब्रह्मण्यत्वशरण्यत्वादयो महांतो गुणा यस्मिन्नित्याः सहज्ञानं वियंति न लीयंते स्म तेन गुणपा
त्रेण गुणालयेन॥ पाप्मना पापहेतुना॥३२॥ ॥३३

तस्यविरहोदुःसह इत्याहचतुर्थिः ॥ ब्रह्मादयोयस्याः श्रियाः अपांगमोक्षं तस्मिन्नूरूपादृष्टिपातः तत्कामाः संतः वक्रतिर्यं वक्रकालंतपस्तमाच
रन्तूमस्यकुचरंतिस्म ॥ भगवदंघ्रिकमलं मे अपवर्गाश्रिता अपि साश्रीर्यस्यपादलावण्यंपुष्कलमनुरक्तासतीस्वैवतेतस्यभगवतः श्रीमदंघ्रिःपदे ॥
केतुर्ध्वजवज्राद्यादयोकेतानि चिह्नानियेषांतैः यद्वा ब्रह्मादीनामाश्रये सत्सुगलक्तमस्गांयस्याः स्याऽहंततोभगवतश्चविलतिस्पदंउपलक्ष्य
प्राप्यथीनूलोकान् अतिक्रम्य अरोचयश्चयोतितवत्पास्मिपश्चाततस्याविक्तते रंतेनाथकालेजाते सतिउत्क्रमयंतीगर्वंकुर्वाणामांस्वव्यस्वज

ब्रह्मादयोवक्रतिर्यं यदपांगमोक्षकामास्तपःसमचरन्भगवत्प्रपन्ना ॥ साश्रीःस्ववासमरविंदवनंविहाय यत्पादसौभगमलं
भजतेऽनुरक्ता ॥ ३४ ॥ तस्याहमब्जकुलिशांकुशकेतुकेतैः श्रीमत्पदैर्भगवतः समलंकृतांगी ॥ त्रीनत्यऽरोचउपलक्ष्यलतो
विक्रतिलोकान्समांव्यसृजदुत्स्मयंतीतदंते ॥ ३५ ॥ योवैममातिभरमासुरवंशराज्ञामक्षौहिणीशतमपानुदात्मतंत्रः ॥
वोदुःस्थपदमात्मनिपौरुषेणसंपादयन्यदुषुरम्यमविभ्रदंगं ॥ ॥ ३६ ॥

६७

तत्पकवान् ॥ किंच ॥ योवैअसुरवंशो येषांतेषांराज्ञां अक्षौहिणीशतरूपंममातिभरंभारं अपनीतवान् । चांचैर्पदवा तदुःस्थंस
तंपौरुषेणपुरुषाकारेणआत्मानिस्वस्मिन्संपूर्णपदंसुस्थंसंपादयन् । लक्षणहेतोःक्रियायाइतिहेतौशतृप्रत्ययःसंपा
दयितुमित्यर्थः । आविभ्रतधृतवानित्यर्थः ॥ ४ ॥ ३८ ६७

अलंकृताभाः स्कंधे १ ७

तस्यविरहंकावासमहेतु ॥ प्रेमावलोकरुचिरंस्मितंचवल्गुजल्पञ्चतैर्मधुमातिनीनांमत्स्यमादीनांसमानंगर्वमाहितंस्थैर्यंभुवमंखयंच्चहरत् ॥ यस्यांघ्रिरजःसु
स्थितेनविटंकिताया स्मत्पादिमिषणरोमास्यवेत्तवति ॥ कथयतोः मतोः प्राचीपूर्ववाहिनीकुरुक्षेत्रे ॥ इतिप्रथमेषोडशः ॥ ततः सप्तदशेराज्ञः कलेर्निग्रहउ
च्यते ॥ तस्यैववीर्यताडनोऽपिवैराग्यवक्तुमद्भुतं ॥ हन्यमानंताड्यमानंमृणालपद्मकंद तद्धवले ॥ नयानमेहंतंमूत्रयंतं ॥ इवेतपन्येनपादावशेषोधर्मासयान्य
... १६

काबासहेतविरहंश्रुत्वोत्तमस्यप्रेमावलोकरुचिरस्मितवल्गुजल्पैः ॥ स्थैर्यंसमानमहरन्मधुमानिनीनांरोमोत्सवोममयदंघ्रिविटंकिता पृथिवीधर्म
याः ॥ तयोरेवंकथयतोः पृथिवीधर्मयोस्तदा ॥ परीक्षिन्नामराजर्षिः प्राप्तःप्राचींसरस्वतीं ॥ इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेषोडशो काद१२
ध्यायः ॥ सूतउवाच ॥ तत्रगोमिथुनंराजाहन्यमानमनाथवत् ॥ दंडहस्तंचवृषलंददर्शनृपलांछनं ॥ १ ॥ वृषंमृणालधवलंमेहंतमिवबिभ्यतं
वेपमानंपदैकेनसीदंतंशूद्रताडितं ॥ २ ॥ गांचधर्मदुघांदीनांभृशंशूद्रपदाहतां ॥ विवत्सामश्रुवदनांक्षामांयवसमिच्छतीं ॥ ३ ॥ पप्रच्छरथ
मारूढः कार्तस्वरपरिच्छदं ॥ मेघगंभीरयावाचासमारोपितकार्मुकः ॥ ४ ॥ ५ ॥

यान्निवप्रतिक्षणंक्षीयमाणांगाशः तस्याप्यनिर्वाहात् कंपमानइत्येवेतिदर्शितं ॥ धर्मदुघांहविर्द्वारागंधौद्रीक्षामांकृशां ॥ यवसंतृणं ॥ अत्रापिमस्मादिव
मवक्तव्यांविवसैवयज्ञाभावात्क्षमां ॥ अतएवयज्ञभागमिच्छतींदधतीतिसूचितं ॥ ६ ॥ ७ ॥ ८ ॥ ॥ ॥ ९ ॥ कलायतनमथ ॥ ॥ ॥ १० ॥ ॥ ॥
१५ कार्तस्वरंसुवर्णंपरिच्छदः परिच्छदः यस्य ॥ सुवर्णनिबद्धमितर्थः ॥ सउि

भा०प्र

हंस्मिघातयाम्सि॥राजाऽहमितिचेद्व्राह॥नटवत्वेषमात्रेणनरदेवोऽस्मिकर्मणातुअद्विजश्शूद्रः॥अशोच्यान्निरपराधानिहास्मिन्यंप्रहरन्निमंशोच्यः॥
मापरायोऽसिअतोवधमर्हसि॥वृषंप्रत्याह॥त्वंवेतिहेमृणालधवलत्वंवाकः॥स्वयमेवसंज्ञाव्यति॥किंकश्चिद्देवोवृषरूपेणास्मान्परिखेदयन्वर्त्तसे॥दोर्दंडैः
परिरंभितवसुराखिलातेत्वयाविनाश्रुवःअश्रूणिअन्येषामश्रूणिनानुपतंतीतिखेदहेतुत्वंदर्शितं॥एवमुक्तेपुनरपिशोचंतंप्रत्याह॥मासुरभेपुत्रमाशुचः॥
६८ कंमाकुरु॥व्येतुअपयातु॥गांप्रत्याह॥अंबमातःशास्तरिमयिजीवतिमातितमङ्सेवा॥अंतामारोदीः॥ममहितार्थमेवैनंहनिष्यामि॥नतवापकारायेत्याह॥

राजोवाच कस्त्वंमच्छरणेलोकेबलाद्धंस्यबलान्बली॥नरदेवोऽसिवेषेणनटवत्कर्मणाऽद्विजः॥५॥यस्त्वंकृष्णेगतेदूरंसहगांडीवधन्वना॥शोच्यो
ऽस्यशोच्यान्रहसियत्प्रहरन्वधमर्हसि॥६॥त्वंवामृणालधवलपादैर्न्यूनःपदाचरन्॥वृषरूपेणकिंकश्चिद्देवोनःपरिखेदयन्॥७॥न
जातुकौरवेंद्राणांदोर्दंडपरिरंभिते॥भूतलेऽनुपतंत्यस्मिन्विनातेप्राणिनांशुचः॥८॥मासौरभेयानुशुचोव्येतुतेवृषलाद्भयं॥मा
रोदीरंबभद्रंतेखलानांमयिशास्तरि॥९॥यस्यराष्ट्रेप्रजाःसर्वास्त्रस्यंतेसाध्व्यसाधुभिः॥तस्यमत्तस्यनश्यंतिकीर्त्तिरायुर्भगो ६८
गतिः॥१०॥एषराज्ञःपरोधर्मोह्यार्त्तानामार्त्तिनिग्रहः॥अतएनंवधिष्यामिभूतद्रुहमसत्तमं॥११॥कोऽवृश्चत्तवपादांस्त्रीन्सौ
रभेयचतुष्पदः॥माभूवंस्त्वादृशाराष्ट्रेराज्ञांकृष्णानुवर्त्तिनां॥१२॥आख्याहिवृषभद्रंवःसाधूनामकृतागसां॥आत्मवैरू
प्यकर्त्तारंपार्थानांकीर्त्तिदूषणं॥१३॥ ॥

यस्येतिह्यात्यंहिसाधि॥सर्वायाःकाश्चिदपीत्यर्थः॥असाधुभिः॥त्रस्यंतेपीड्यंतेइत्यर्थः॥भगोभाग्यं॥गतिःपरलोकः॥पुनरतिशोचंतंवृषभंप्र
त्याह॥कःअवृश्चत्विछेद॥त्वादृशाःत्वद्विधाःदुःखिताः॥वोयुष्माकं॥आत्मनस्तवपादच्छेदेनवैरूप्यंकृतवंतं॥कीर्त्तिंदूषयतीतितथातं
आख्याहि॥१३॥